॥ हरि सर्वोत्तम ॥ ॥ वायु जीवोत्तम ॥

॥ श्री दिग्विजय रामो विजयथे ॥



# मध्व वैष्णव तंत्र सारोक्त देवपूजा पद्धति

संग्रहः

बि. ऐन्. सत्यनारायणाचार्

संस्कृत अनुवादः
एम्. प्रमोद्

॥ श्रीः ॥ ॥ श्रीः ॥



ॐ॥ श्री गुरुभ्यो नमः ॥

ॐ॥ श्री परम गुरुभ्यो नमः ॥

ॐ॥ श्रीमदानंदतीर्थ भगवत्पादाचार्येभ्यो नमः ॥

श्रीमद्धनुमद्भीम मध्वांतर्गत रामकृष्ण वेदव्यासात्मक श्रीलक्ष्मीहयग्रीवाय नमः ॥

॥ हरिः ॐ ॥

ॐ नारायणाय परिपूर्ण गुणार्णवाय विश्वोदयस्थिति लयोन्नियति प्रदाय ।

ज्ञान प्रदाय विभुधा सुर सौख्य दुःख सत्कारणाय वितताय नमो नमस्ते ॥

यो विप्रलंब विपरीत मति प्रभूत वादान्निरस्य कृतवान् भुवि तत्ववादम् ।

सर्वेश्वरो हरिरिति प्रतिपादयंतमानंद तीर्थ मुनिवर्यमहं नमामि ॥

( दक्षिणांघ्रि पुरस्सरम् देवगृहम् प्रवेश्य )

॥ अथ द्वारपाल वंदनं ॥

पूर्वद्वारे द्वारश्रियै नमः ॥ ॐ जयाय नमः । ॐ विजयाय नमः ॥

दक्षिणद्वारे द्वारश्रियै नमः ॥ ॐ बलाय नमः । ॐ प्रबलाय नमः॥

पश्चिमद्वारे द्वारश्रियै नमः ॥ ॐ नंदाय नमः । ॐ सुनंदाय नमः ॥

उत्तरद्वारे द्वारश्रियै नमः ॥ ॐ कुमुदाय नमः । ॐ कुमुदाक्षायनमः ॥

(इति चतुर्दिक्षु द्वारपालान्नत्वा – तदनुज्ञामवाप्य – वायुं संप्रार्थ्य)

ॐ वायवा इत्यस्य मधुच्छंद वैश्वामित्रोर्वायुर्गायत्री ।

देवगृहस्य कवाटोद्घाटने विनियोगः । (१. २. १)

ॐ ॥ वायवा याहि दर्शते मे सोमा अरंकृताः । तेषां पाहि श्रुधीहवम् ।

(इति वायुं संप्रार्थ्य – कवाट मुद्घाट्य – तालत्रयं कुर्यात्)

ॐ अग्निनाग्निरित्यस्य मेधातिथिकाण्वोरग्निर्गायत्री । दीप प्रज्वालने विनियोगः ॥ (१.१२. ६)

ॐ ॥ अग्निनाग्नि समिध्यते कविर् गृह पतिर्युवा । हव्यवाड् जुह्वास्यः ॥

(इति दीपं प्रज्वाल्य)

॥ तत्वाभिमानि देवता वंदनम् ॥

ॐ ॥ वंदे विष्णुं नमामि श्रिय मथ च भुवं ब्रह्म वायू च वंदे ।

गायत्रीं भारतीं तां अपि गरुडमनंतं भजे रुद्र देवं ॥

देवीर्वंदे सुपर्णीम् अहिपति दयितां वारुणीमप्युमां तां ।

इंद्रादीन् काम मुख्यान् अपि सकल सुरान् स्तद् गुरून् मद् गुरूंश्च ॥

(इति सर्व देवान् नत्वा – अथ भूतोच्चाटनं)

अपसर्पंत्वित्यस्य वामदेवो भूतान्यनुप् । भूतोच्छाटने विनियोगः ॥

ॐ अपसर्पंतु ये भूता ये भूता भुविसंस्थिताः । ये भूता विघ्नकर्तारस्तेनश्यंतु शिवाज्ञया । अपक्रामंतु ये भूताः क्रूराशैवतु राक्षसाः । ये चात्र निवसंत्येवदेवता भुवि संततं । तेषामप्य विरोधेन ब्रह्म कर्म समारभे ।

(इति भूतोच्छाटनं कृत्वा – छोटिका मुद्रया समस्त भूतान्युच्छाट्य –

अस्त्रायपट् – नाराचमुद्रया दिग्बंधनं कुर्यात्)

ॐ अपैवाभी भत्संत मनु गंधात्त एते धाम्ये अचितर्धदत ॥

(ऐतरेय ब्राह्मण)

ॐ येभ्यो मातेत्यस्य मंत्रस्य गयव्रातः विश्वेदेवा जगती छंदः ।

मनुष्यगंध निबर्हणार्थे जपे विनियोगः ॥ (१०.६३.३)

ॐ॥ येभ्यो माता मधुमत् पिन्वते पयः पीयूषं द्यौरदिति रद्रि बर्हाः ।

उक्थ शुष्मान् वृषभरान् स्वप्न संस्थान् आदित्यान् अनुमदा स्वस्थये ॥

ॐ येवापित्रे इत्यस्य गृत्समदो बृहस्पतिस्त्रिष्टुप् । अंतःपट निबर्हणार्थे जपे विनियोगः ॥ (४. ५०. ६)

ॐ॥ येवापित्रे विश्व देवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।

बृहस्पते सुप्रजा वीरवंतो वयं स्याम पतयो रयीणां ॥

मानुषोगंध आयाति देवतत् क्षम्यतां प्रभो ।

(इति संप्रार्थ्य– श्री ब्रह्मपार स्तोत्रं पठेत्)

॥ श्री ब्रह्मपार स्तोत्रं ॥

श्री ब्रह्मपार स्तोत्र मंत्रस्य । कंडु ऋषिः । विश्वेदेवा देवताः । त्रिष्टुप् छंदः। पूजाधिकार सिद्ध्यर्थे जपे विनियोगः ॥

ॐ प्रचेतस ऊचु ः ॥

ब्रह्म पारं मुने श्रोतु मिच्छामः परमं स्तवं ।

जपता कंडुना देवो ये नाराध्यत केशवः ॥ १ ॥

सोम उवाच ॥

पारं परं विष्णुरनंत पारः परः पराणामपि पार पारः ।

सब्रह्मपारः परपार भूतः परः परेभ्यः परमार्थ रूपी ॥ २ ॥

सकारणं कारण तस्ततोऽपि तस्यापि हेतुः परहेतु हेतुः ।

कार्ये चैवं सहकर्म कर्तृ रूपैरशेषै रवतीह सर्वं ॥ ३ ॥

ब्रह्म प्रभुर् ब्रह्म स सर्वभूतो ब्रह्मप्रजानां पति रच्युतोऽसौ ।

ब्रह्माव्ययं नित्यमजं स विष्णु रपक्षयाद्यै रखिलैरसंगी ॥ ४ ॥

ब्रह्माक्षरमजं नित्यं यथा ऽ सौ पुरुषोत्तमः ।

तथा रागादयो दोषाः प्रयांतु प्रशमं मम ॥ ५ ॥

य एतद् ब्रह्म पाराख्यं संस्तवं परमं जपन् ।

आवाप परमां सिद्धिं स समाराध्य केशवम् ॥ ६ ॥

(इति श्री ब्रह्मपार स्तोत्रं)

॥ घंटावादनम् ॥

ॐ ॥ आगमार्थंतु देवानां गमनार्थंतु रक्षसाम् ।

कुरु घंटारवं तत्र देवताह्वान लांछनम् ॥

अज्ञाना ज्ञानतोवापी कांस्य घंटान् आवादयेत् ।

राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत् ॥

तस्मात्सर्व प्रयत्नेन घंटामावादयेत्ततः ।

घंटाग्रे ब्रह्म दैवत्यं मुकुटे रुद्र दैवतं ॥

नादे सरस्वती चैव नाले नागादि दैवतम् ॥

(इति मंत्रेण घंटानादं कृत्वा)

॥ अथ निर्माल्य विसर्जनम् ॥

(संपुटोद्धाटनं । ततो जवनिकां त्यक्त्वा । निर्माल्यं विसृजेत्ततः)

ॐ सक्तुमिवेत्येति बृहस्पतिर्ज्ञानं त्रिष्टुप् । मुखवस्त्र विसर्जने विनियोगः ॥ (१०.७१.२)

ॐ॥ सक्तुमिव तित उना पुनंतो यत्र धीरा मनसा वाच मक्रत ।

अत्रा सखायः सख्यानि जान ते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥

(इति देवस्य मुखवस्त्रं विसृज्य – शयानं देवं निरीक्ष्य)

कृतांजलि पुटो भूत्वा विनयानत कंधरः । मानसान् वाचिकान् पापान् क्षमस्व पुरुषोत्तमः ।

वैष्णव द्वेष हेतून्मे भस्मसात् कुरु माधव ॥ (इति विज्ञाप्य)

कृतांजलि पुटो भूत्वा विनयानत कंदरः । याचेत्वां देव पूजार्थं उत्तिष्ठत्वम् रमापते ॥

ॐ उत्तिष्ठ ब्रह्मणस्पते इत्यस्य काण्वोघौरः ब्रह्मणस्पतिर्बृहती । प्रार्थने विनियोगः ॥ (१.४०. १)

ॐ ॥ उत्तिष्ठ ब्रह्मण स्पते देव यंतस्त्वेमहे ।

उप प्रयंतु मरुतः सुधानव इंद्र प्राशूर्भवा सचा ॥

स्वामिन् कृपया पूजार्थमुत्तिष्ठ ॥

आयताभ्यां विशालाभ्यां शीतलाभ्यां कृपानिधे ।

करुणामृत पूर्णाभ्यां लोचनाभ्यां विलोकया ॥ (इति संप्रार्थ्य)

ॐ ॥ नमो ब्रह्मण्य देवाय गो ब्राह्मण हितायच ।

जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ ( इति प्रणम्य )

ॐ॥नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्॥

(इति विष्णु गायत्रीं पठित्वा – संपुटमुद्घाट्य)

देवस्य वामभागे कृतांजलि पुटाय सस्त्रीकाय सल्लक्षणाय शंकराय नमः ।

तन्मस्तके ॐ भूं भुवे नमः । (इति सुवर्ण पात्रं विचिंत्य – तत्र विसर्जित निर्माल्यं संस्थापयेत् – देवस्य

श्री तुलसी निर्माल्य विसर्जनं करिष्ये –

निर्माल्य तुलसीदलानि देवस्य वामभागे निधाय –शालग्रामादीन् स्नान पात्रे

संस्थाप्य – कलशोदकं मूल मंत्रेणाभिमंत्र्य)

ॐ॥ सालिग्राम निवासाय क्षीराब्धि शयनाय च । श्रीशैलाद्रि निवासाय शिला वासायते नमः ॥

**॥ ऋषभ सूक्तं ॥**

ॐ ऋषभं मा इति पंचर्चस्य सूक्तस्य । ऋषभो वैराजो शाक्वरो वा ऋषिः । सपत्नघ्नम् देवता । अनुष्टुप्

छंदः पंचमि महापंक्तिः । कलि विसर्जने विनियोगः ॥ (१०. १६६. १)

ॐ॥ ऋषभं मा समाना नां सपत्नानां विं सहिम् ।

हंतारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥ १ ॥

अहमस्मि सपत्न हेंद्र इवारि अक्षतः ।

अधः सपत्ना मे पदो रिमे सर्वे अभिष्ठिता ः ॥ २ ॥

अत्रैव वो ऽ पि नह्याम्युभे आर्त्नीइवज्यया ।

वाचस्पते निषेधेमान्, यथा मदधरं वदान् ॥ ३ ॥

अहमस्मि सपत्न हेंद्र इवारि अक्षतः ।
अधः सपत्ना मे पदो रिमे सर्वे अभिष्ठिता : ॥ २ ॥
अत्रैव वो ऽ पि नह्याम्युभे आर्त्नीइवज्यया ।
वाचस्पते निधेमान्, यथा मदधरं वदान् ॥ ३ ॥
अभिभूरह मागमं विश्वकर्मेण धाम्ना ।
आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥ ४ ॥
योगक्षेमं व आदायाहं भूयासमुत्तम आवो मूर्धानमक्रमीम् ।
अधस्पदान्म उद्वदत मंडूका इवोदकान् मंडूका उदकादिव ॥ ५ ॥
॥ ॐ शांतिः शांतिः शांतिः ॥

ॐ॥ सालिग्राम शिलायांतु नित्यं सन्निहितः कलिः । भीमसेन महाबाहो गदया पोथय प्रभो ॥

॥ अंभृणी सूक्तेन अभिषेकं कुर्यात्॥

## ॥ अथ अंभृणि सूक्तं ॥

ॐ अहं रुद्रेभिरिति अष्टर्चस्य सूक्तिस्य । अव् बृम् णस्य परमात्मा द्वितीया

जगती शिष्टाः सप्त त्रिष्टुभः । निर्माल्य विसर्जने विनियोगः ॥ ( १०. १२५. १ )

अहं रुद्रेभिर् वसुभिश्चराम् म्यहमा दित्यैरुत विश्वदेवैः ।
अहं मित्रा वरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥ १ ॥
अहं सोम माहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३यजमानाय सुन्वते ॥ २ ॥
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्या वेशयंतीम् ॥ ३ ॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।

अमंतवो मां त उप क्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ ४ ॥
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हंतवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ ६ ॥
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व १ न्तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वो ता मूं द्यां वर्ष्मणोप स्पृशामि ॥ ७ ॥
अहमेव वात इव प्रवाम्या रभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥ ८ ॥

॥ ॐ शांतिः शांतिः शांतिः ॥

## ॥ श्रीः ॥ अथ श्रीसूक्तम् ॥ श्रीः ॥

॥ अथ ध्यानं ॥

ॐ ॥ अरुण कमलसंस्था तद्रजः पुंजवर्णा करकमल धृते भीतियुग्मांबुजाता ।
मणिमुकुट विचित्रालंकृतिः पद्ममाला भवतुभुवनमाता संततं श्रीः श्रियै नः ॥

ॐ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य ।आनंद कर्दम चिक्लीतेंदिरात्रऋषयः ।
श्रीरग्निर्देवता । आद्यास्त्रिस्रोऽनुष्टुभः । चतुर्थी बृहती । पंचमी षष्ठ्यौ त्रिष्टुभौ । ततोऽष्टावनुष्टुभः । अंत्या प्रस्तार पंक्तिः । शंखाभिषेके विनियोगः ॥

(२– ३५– १० ) ( पंचम मंडलांते खिलः )

ॐ ॥ हिरण्यरूपः स हिरण्य संदृगपां न पात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर् निषद्या हिरण्य दा ददत्यन्न मस्मै ॥
ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥

तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ ३ ॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥
चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टा मुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्यस्य मयि श्रीः श्रयतां यशः ॥ १० ॥
कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्म मालिनीम् ॥ ११ ॥
आपः सृजंतु स्निग्दानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ।

चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीं ।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥

तां म आवह जातवेदो लक्षीमनपगामिनीम् ।

यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विंदेयं पुरुषानहम् ॥ १५ ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् ।

श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

फलश्रुतिः

===========

पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे ।

त्वं मां भजस्व पद्माक्षि येन सौख्यं लभाम्यहम् ॥ १ ॥

अश्वदायी गोदायी धनदायी महाधने ।

धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ २ ॥

पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवे रथम् ।

प्रजानां भवसि माता आयुष्मंतं करोतु माम् ॥ ३ ॥

चंद्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीम् ।

चंद्रसूर्याग्नि वर्णाभां महालक्ष्मीमुपास्महे ॥ ४ ॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।

धनमिंद्रो बृहस्पतिर्वरुणं धनमश्नुते ॥ ५ ॥

वैनतेय सोमं पिबसोमं पिबतु वृत्रहा ।

सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ ६ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।

भवंति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥ ७ ॥

वर्षंतु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहंतु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥ ८ ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णु मनोऽनुकूले तत्पादपद्मं मयि सन्निधत्स्व ॥ ९ ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गंभीरा वर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ॥
लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैः स्नापिता हेमकुंभैः ।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ॥ १० ॥
लक्ष्मीं क्षीरसमुद्र राजतनयां श्रीरंगधामेश्वरीं ।
दासीभूतसमस्त देव वनितां लोकैकदीपांकुरां ॥
श्रीमन्मंद कटाक्ष लब्धविभव ब्रह्मेंद्र गंगाधरां ।
त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियां ॥ ११ ॥
सिद्धलक्ष्मीर् मोक्षलक्ष्मीर् जयलक्ष्मीः सरस्वति ।
श्रीर् लक्ष्मीर् वरलक्ष्मीश्च प्रसन्ना भव सर्वदा ॥ १२ ॥
वरांकुशौ पाशमभीतिमुद्रां करैर् वहंतीं कमलासनस्थां ।
बालार्ककोटि प्रतिभां त्रिणेत्रां भजेऽहमाद्यां जगदीश्वरीं तां ॥ १३ ॥
सर्वमंगल मांगल्ये शिवे सर्वार्थ साधके ।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते ॥ १४ ॥
सरसिज निलये सरोजहस्ते धवलतरांशुक गंधमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूति करि प्रसीद मह्यम् ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधव प्रियाम् ।
विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभां ॥ १५ ॥
ॐ ॥ महालक्ष्मी च विद्महे विष्णुपत्न्यै च धीमही ।

तन्नो लक्ष्मीः प्रचोदयात् ॥ १६ ॥
श्रीर्वर्चस्व मायुष्य मारोग्यमावीधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ १७ ॥
ऋण रोगारि दारिद्य पापक्षुदपमृत्यवः ।
भय शोक मनस्तापा नश्यंतु मम सर्वदा ॥ १८ ॥
॥ ॐ शांतिः शांतिः शांतिः ॥

## ॥ श्री मुख्य प्राणाद्यभिषेकः ॥

॥ ॐ श्री हनुमतेनमः ॥

ॐ ॥ नमस्ते प्राणेश प्रणत विभवा याव निमगाः नमः स्वामिन्
राम प्रियतम हनूमन् गुरु गुण । नमस्तुभ्यं भीम प्रबलतम
कृष्णेष्ट भगवन् नमः श्रीमन्मध्व प्रदिश सुदृशं नो जय जय ॥

श्री विष्णु प्रेरणया श्रीविष्णु प्रीत्यर्थं अस्मदादि गुरुभूत श्रीमुख्य प्राणस्य बळित्थासूक्तेन, मन्युसूक्तेन, वायुस्तुत्या च अभिषेकं करिष्ये ॥ ॐ श्री मुख्य प्राणाय नमः ॥

## ॥ अथ बळित्थासूक्तं ॥

ॐ बळित्थेति पंचर्चस्य सूक्तस्य दीर्घतमा वायुर्जगती । मुख्य प्राणाभिषेके विनियोगः ॥ (१–१४१=१)

बळित्था तद् वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर् ऋतस्य धेना अनयंत सस्रुतः ॥ १ ॥
पृक्षो वपुः पितुमान् नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयंत योषणः ॥ २ ॥

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रंत सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा संतं मातरिश्वा मथायति ॥ ३ ॥
प्रयत् पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद् घृणा शुचिः ॥ ४ ॥
आदिन्मातॄ राविशद् यास्वा शुचिर हिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्वा अरु हत्सना जुवो नि नव्यसीष्ववरासु धावते ॥ ५ ॥
॥ ॐ शांतिः शांतिः शांतिः ॥

गरुड शेषादीन् अभिषिच्य – गरुड शेष रुद्रेभ्यो नमः ॥

**॥ गरुड गायत्री मंत्र ॥**

ॐ॥ तत्पुरुषाय विद्महे सुवर्ण पक्षाय धीमहि ।
तन्नो गरुडः प्रचोदयात् ॥

**॥ शेष गायत्री मंत्र ॥**

ॐ॥ सहस्रफणाय विद्महे सुवर्ण पुंजाय धीमहि ।
तन्नो शेषः प्रचोदयात् ॥

**॥ रुद्र गायत्री मंत्र ॥**

ॐ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात्॥

**॥ गणपति गायत्री मंत्र ॥**

ॐ॥ एकदंताय विद्महे वक्रतुंडाय धीमहि ।
तन्नो दंती प्रचोदयात् ॥

**॥ सुब्रह्मण्य गायत्री मंत्र ॥**

ॐ॥ तत्पुरुषाय विद्महे महासेनाय धीमहि ।
तन्नः षण्मुखः प्रचोदयात् ॥

**॥ श्री टीकाकृत्पादरु ॥**

मिथ्या सिद्धांत दुर्ध्वांत विध्वंसन विचक्षणः ।

जयतीर्थाख्य तरणिर् भासतां नो हृदंबरे ॥

**॥ श्री ब्रह्मण्य तीर्थरु ॥**

कंसध्वंसि पदांभोज संसक्तो हंसपुंगवः ।

ब्रह्मण्य गुरुराजाख्यो वर्ततां मम मानसे ॥

**॥ श्री श्रीपादराजरु ॥**

तं वंदे नृसिंह तीर्थ निलयं श्रीव्यासराट् पूजितं ।

ध्यायंतं मनसा नृसिंह चरणं श्रीपादराजं गुरुं ॥

**॥ श्री व्यासराजरु ॥**

अर्थिकल्पित कल्पोयं प्रत्यर्थि गजकेसरी ।

व्यासतीर्थ गुरुर् भूयादस्मदिष्टार्थ सिद्धये ॥

**॥ श्री रघूत्तम तीर्थरु ॥**

रघूत्तम गुरुंवंदे रघूत्तम पदार्चकं ।

गांभीर्येणार्थ बाहुल्य टीकातात्पर्य बोधकं ॥

**॥ श्री वादिराजरु ॥**

तपोविद्या विरक्त्यादि सद्गुणौ घाकरानहम् ।

वादिराज गुरून् वंदे हयग्रीव दयाश्रयान् ॥

**॥ श्री विजयींद्र तीर्थरु॥**

भक्तानां मानसां भोज भानवे कामधेनवे ।

नमतां कल्पतरुवे जयींद्र गुरवे नमः ॥

**श्री मंत्रालय रायरु ॥**

पूज्याय राघवेंद्राय सत्य धर्म रतायच । भजतां कल्पवृक्षाय नमतां

कामधेनवे ॥ (ॐ ॥ श्रीपूर्ण बोध गुरुतीर्थ पयोब्धि पारा . . . इत्यादि)

निर्माल्य तीर्थ धारणमंत्र ॥

ॐ स्नात्वा पादोदकं विष्णोः पिबन् शिरसिधारयन् ।

सर्वपाप विनिर्मुक्तो वैष्णवीं सिद्धिमाप्नुयात्।

॥ अथ मंटप ध्यानं ॥

ॐ ॥ उत्तप्तोज्वल कांचनेन रचितं तुंगांग रंगस्थळं ।

शुद्ध स्फाटिक भित्तिका विलसितै स्थंभैश्च हैमैः शुभैः ॥

द्वारैश्चामर रत्नराज खचितैः शोभावहैः मंडितैः ।

स्तत्रान्यैरपि शंख पद्म धवलैः प्रभ्राजितं स्वस्तिकैः ॥

मुक्ताजाल विलंभि मंटप युतैः वज्रैश्च सोपानकैः ।

नान रत्न विनिर्मितैश्च कलशै रत्यंत शोभावहम् ॥

माणिक्योज्वल दीप दीप्ति विलसल् लक्ष्मीविलासास्पदं ।

ध्यायेन् मंटप मर्चनेषु सकलै रेवंविधैः साधकैः ॥

संमार्जनै रंगवल्ली ध्वज केतक तोरणैः ।

विता नैरिक्षु कदली पूर्ण कुंभांकुरादिभिः ॥

गीत वादित्र नृत्यैश्च पुराण पठनैः शुभैः ।

शोभमानं महापुण्यं वर्धमानं मनोहरं ॥

(इति मंटप ध्यानं)(पापपुरुष विसर्जन पूर्वक गुरुमंत्र–मूलमंत्र–तत्व स मातृकान्यासादिगळन्नु माडि –नंतर)

॥ अथ प्रार्थना ॥

ॐ निषुसीद इत्यस्य नभःप्रभेदनो वैरूप इंद्रस्त्रिष्टुप् प्रार्थने विनियोगः ॥

(१०. ११२. ८)

ॐ ॥ निषुसीद गणपते गणेषुत्वा माहुर्वि प्रतमं कवीनाम् ।

नऋते त्वत् क्रियते किंचनारे महामर्कं मघवन् चित्रमर्च ॥

आराध्यसे प्राणभृतां प्रणेत्रा प्राणाधि नाथेन समीरणेन ।

नारायण ज्ञान सुकैकपूर्ण स्वामिन् मम श्रीरमण प्रसीद ॥

बिंबोसि प्रतिबिंबोऽस्मि तव यद्यपिचांतरम् ।

स्वामिन् निर्दोष मद्धोषं विरेचय नमोस्तुते ॥

भगवन् यन्मया कर्म शुभं कारयसे प्रभो ।

तत्सर्वं विष्णु पूजास्तु तव देव प्रसादतः ॥

जयाच्युत जयानंत जयकृष्ण हरे प्रभो ।

जयकेशव लक्ष्मीशेत् युक्त्वा कृं प्रपूजयेत् ॥

(इति प्रार्थनी मुद्रया संप्रार्थ्य)

॥ देव पूजार्थ संकल्पः ॥

(आचम्य – प्राणानायम्य – देशकालादीन् उच्चार्य)

शुभतिथौ श्री भारतीरमण मुख्यप्राणांतर्गत श्रीलक्ष्मीनारायण प्रेरणया, श्रीलक्ष्मीनारायण प्रीत्यर्थं, भगवतो बलेन, भगवतो वीर्येण, भगवतस्तेजसा, भगवतः कर्मणा, भगवता संजीवित स्वांत वपुश्चिदिंद्रियोऽहं अनंतावतार रूप गुण क्रियात्मक भगवंतं, श्रीवासुदेवस्य वेद श्रीमत् तंत्र सारोक्त विधानेन, यथाशक्ति, यथामति, यथामिलितोपचारैः, यथामिलित व्यवधानैः, ध्यानावाहनादि षोडशोपचार पूजां करि ॥

(इति संकल्प्य)

॥ अथ कलश पूजा ॥

भगवत्पूजांगत्वेन कलश पूजां करि ॥ ॐ नमोनारायणाय ॥ (कलशद्वयं निधाय– वस्त्र शोधितमुदकं संपूर्य– चतुर्दिक्षु गंधाक्षतादिभिरलंकृत्य, तुलसीदलानि निक्षिप्य, कलशं स्पृष्ट्वा मंत्रं जपेत्)

ॐ॥ कलशस्य मुखे विष्णुः कंठे रुद्रस्समाश्रितः ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥

कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुंदरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः ॥ २ ॥

अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।

अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ॥ ३ ॥

आयांतु देव पूजार्थं अभिषेकार्थ मादरात् ।

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।

आयांतु देव पूजार्थं दुरितक्षय कारकाः ॥ ४ ॥

गंगे च यमुनेचैव गोदावरी सरस्वती ।

नर्मदे सिंधु कावेरि जलेस्मिन् सन्निधिं कुरु ॥५॥

ॐ इमं मे गंगे इति सिंधुक्षित प्रियमेधः नद्यो जगती । नद्यावाहने विनियोगः ॥ (१०.७५.५)

ॐ॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परु ।

असिक्न्या मरुध् वृधे वितस्तयार् जीकीये शृणुह्या सुमया ॥ ६ ॥

स्नानीय कलशे पूर्ण कलशे च भागीरथ्यादि तीर्थान्यावाहयामि ।




ॐ सहस्रार हुं फट् । (इति सुदर्शन मंत्रेण रक्षां कृत्वा)

निर्विषीकरणार्थं तार्क्ष्य मुद्रां प्रदर्शयामि।

अमृतीकरणार्थं धेनु मुद्रां प्रदर्शयामि ।

पवित्रीकरणार्थं शंख मुद्रां प्रदर्शयामि ।

संरक्षणार्थं चक्र मुद्रां प्रदर्शयामि ।

दिग्बंधनार्थं गदा मुद्रां प्रदर्शयामि ।

जलशोधनार्थं पद्म मुद्रां प्रदर्शयामि ।

(" ॐ नमो नारायणाय " इति अष्टवारं जप्त्वा)

एकपंचाशद् वर्णानां चतुर्विंशति मूर्तयः ।

आत्माद्या वासुदेवाद्य विश्वाद्या मत्स्य कच्चपौ ॥

कोलो नृसिंहस्सवटुर् जामदग्न्य रघूद्वहौ ।

वासिष्ट यादवौ कृष्णावात्रेयौ बुद्ध कल्कि नौ ॥

शिंशुमारश्चेति शतं कलाः कलश देवताः ।

स्नानीय कलशे अजादि शत मूर्तीः आवाहयामि ॥

अजादि शिंशुमारांत मूर्तिभ्यो नमः ॥ ॐ नमो नारायणाय ॥

भगवन्नागच्छा ऽ गच्छ । सश्रीकं सपरिवारं अजादि शतकला सहितं श्री लक्ष्मीनारायणं कलशमध्ये आवाहयामि ॥ (अन्यगृहे सूर्यमंडलादावाहयामि)

व्युत्क्रुमे शिंशुमारश्च कल्कि बुद्ध स्ततः परम् ।

आत्रेय व्यासकृष्णाश्च राघवो भार्गवः स्ततः ॥

वामनो नारसिंहश्च वराहः कूर्म एवच ।

मत्स्यस् तुर्यादयः पश्चाद् अनिरुद्धादयस्ततः ॥

ज्ञानात्माद्याः कृष्ण पूर्वा देवताः केशवांतिमाः ।

नृसिंहा अजांतश्च शतं कलश देवताः ॥

एताभिः सहितां मूलमूर्तिं कुंभोदके आवाहयामि । कलशद्वये तत्वन्यास

– मातृकान्यास देवताभ्योनमः ॥ शिंशुमारादिभ्यो नमः । ॐ नमोनारायणाय ॥ भगवन्नागच्छाऽगच्छ शिंशुमारादि शतकला सहितं सश्रीकं सपरिवारं श्रीलक्ष्मीनारायणं कुंभमध्ये आवाहयामि ॥ (अन्य गृहे –

सूर्य मंडलादावाहयामि)

ॐ नमो नारायणाय अर्घ्यं समर्पयामि । पाद्यं । आचमनीयं ।

मधुपर्कं । पुनराचमनं । स्नानं । वस्त्रं । उपवीतम् । विभूषणं । आसनं ।

गंधं । पुष्पं समर्पयामि । धूपं । दीपं । नैवेद्यार्थे अमृतोपहार

महानैवेद्यं समर्पयामि । पुनर्धूप, दीप, नीराजनं समर्पयामि ॥

सर्वोपचार पूजान् समर्पयामि ॥ प्रार्थना ॥

ॐ ॥ कलशः कीर्ति मायुश्च प्रज्ञां मेधां श्रियम् बलम् ।

योग्यतां पाप हानिं च पुण्यवृद्धिं च साधयेत् ॥

सर्वतीर्थ मयो यस्मात् सर्वक्षेत्र मयो यतः ।

अतो हरि प्रियोऽसित्वं पूर्णकुंभ नमोस्तुते ॥

(इति संप्रार्थ्य)

यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु ।

न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥

मंत्र हीनं क्रिया हीनं भक्तिहीनं रमापते ।

यत्कृतंतु मया देव परिपूर्णं तदस्तुमे ॥

अनेन कलश देवता पूजनेन बुध वरुणादि देवतांतर्गत श्रीभारतिरमण

मुख्यप्राणांतर्गत श्रीलक्ष्मीनारायणः प्रीयतां । प्रीतोभवतु ।

॥ श्रीकृष्णार्पणमस्तु ॥

॥ अथ शंख पूजा ॥

श्रीविष्णु पूजांग शंख पूजां करिष्ये ॥ (कलशोदकेन शंखमापूर्य । तुलसीं निधाय)

निर्विषीकरणार्थं ताक्ष्र्य मुद्रां प्रदर्शयामि ।

अमृतीकरणार्थं धेनु मुद्रां प्रदर्शयामि ।

पवित्रीकरणार्थं शंख मुद्रां प्रदर्शयामि ।

संरक्षणार्थं चक्र मुद्रां प्रदर्शयामि ।

दिग्बंधनार्थं गदा मुद्रां प्रदर्शयामि ।

जलशोधनार्थं पद्म मुद्रां प्रदर्शयामि ।

(" ॐ नमो नारायणाय " इति अष्टवारं जप्त्वा)

ॐ सहस्रार हुं फट् । (इति शंखं प्रक्षाळ्य – शंखं स्पृष्ट्वा)

ॐ ॥ पांचजन्याय विद्महे महाधराय धीमहि । तन्नः शंखः प्रचोदयात् ॥

(इति त्रिवारं जप्त्वा)

शंखे ॐ चंद्रार्काभ्यां नमः । मध्ये ॐ वरुणाय नमः । पृष्ठे ॐ

प्रजापतये नमः । अग्रे ॐ गंगा सरस्वतीभ्यां नमः । त्रिलोकीगत समस्त

तीर्थ देवताभ्यो नमः । शंख देवतांतर्यामि ॐ श्रीलक्ष्मीनारायणाय

नमः ।

(इत्यावाहनादि पुष्पांतोपचारान् समर्प्य–करेण स्पृष्ट्वा – प्रार्थयेत्)

ॐ ॥ त्वं पुरा सागरोत्पन्नो विना विदृतः करे ।

नमितः सर्व देवैश्च पांचजन्य नमोस्तुते ॥ १ ॥

गर्भा देवारि नारीणां विशीर्यंते सहस्रधा ।

तव नादेन पाताळे पांचजन्य नमोस्तुते ॥ २ ॥

दर्शनेन हि शंखस्य किं पुनः स्पर्शनेन च ।

विलयं यांति पापानि हिमवद् भास्करोदये ॥ ३ ॥

नत्वा शंखं करे धृत्वा मंत्रेणाने न वैवः ।

यः स्नापयति गोविंदं तस्य पुण्यं अनंतकम् ॥ ४ ॥

शंखं चंद्रार्क दैवत्यं मध्ये वरुण दैवतं ।

पृष्ठे प्रजापतिस्तत्र अग्रे गंगा सरस्वती ॥ ५ ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।

शंखे तिष्ठंति विप्रेंद्र तस्माच्छंखं प्रपूजयेत् ॥ ६ ॥

(शंखोदकेन पूजा द्रव्याणि प्रोक्ष्य, आत्मानं च प्रोक्ष्य, मूलमंत्रं जपित्वा –शेषं उत्सृज्य)

॥ अथ पीठ पूजा ॥

(संक्षिप्त) ॐ ॥ विरासन भूताय दिव्य रत्न मयाय च ।

प्रधान पुरुषेशाय महा पीठाय ते नमः ॥

(इत्येकवारं पुष्पं समर्पयेत्)

॥ अथ विस्तृत पीठ पूजा ॥

चक्राब्ज मंडले पीठ पूजां कर्तुं गुर्वनुज्ञा स्वीकारार्थं गुरु पूजां करिष्ये ॥

पीठमध्ये परदेवतायै ॐ श्रीलक्ष्मीनारायणाय नमः । वामे गुरवे ॐ

श्री वायवे नमः । दक्षिणे सर्व देवताभ्यो ॐ ब्रह्म रुद्रादिभ्यो नमः ।

पुनर्वामे सर्व गुरु ॐ सनक सनंदनादिभ्यो नमः । एतैरनुज्ञातः पीठ पूजां करिष्ये ॥

पीठाधोभागे : आग्नेये ॐ गरुडाय नमः ।

नैऋत्ये ॐ वेदव्यासाय नमः ।

वायव्ये ॐ दुर्गायै नमः ।

ऐशान्ये ॐ सरस्वत्यै नमः ।

पीठपादोर्ध्वभागे : धर्माधिपतये ॐ यमाय नमः ।

ज्ञानाधिपतये ॐ वायवे नमः ।

वैराग्याधिपतये ॐ शिवाय नमः ।

ऐश्वर्याधिपतये ॐ इंद्राय नमः ।

पीठफलकेषु : पूर्वे अधर्माधिपतये ॐ निऋतये नमः ।

दक्षिणे अज्ञानाधिपतये ॐ दुर्गायै नमः ।

पश्चिमे वैराग्याधिपतये ॐ कामाय नमः ।

उत्तरे अनैश्वर्याधिपतये ॐ रुद्राय नमः ।

पीठाधस्तात् । ॐ परम पुरुय नमः । आधार रूपिणै ॐ श्री शक्त्यै नमः । ॐ विष्णुकूर्माय नमः । तत् पुच्छाश्रिताय ॐ वायु कूर्माय नमः। तत् पुच्छाश्रिताय अनंताख्य ॐ शेषाय नमः । तत् फणाश्रितायै पृथिव्यभिमानिन्यै ॐ भूम्यै नमः । तदुपरि सागराभिमानिने ॐ वरुणाय नमः । रमा रूप ॐ श्वेत द्वीपाय नमः । रमा रूप ॐ दिव्य रत्न मंटपाय नमः । रमा रूप कंदनाळ सहित ॐ पद्माय नमः । पद्मषट् कोणेषु दक्षिण कोणे ॐ सूर्याय नमः । वाम कोणे ॐ सोमाय नमः । सम्मुखे ॐ हुताशनाय नमः । देव वाम कोणे ॐ सत्वाभिमानिन्यै श्रियै नमः । दक्षिण कोणे रजोभिमानिन्यै ॐ भूम्यै नमः । देव पृष्ठे उपबर्हण रूपायै तमोभिमानिन्यै ॐ दुर्गायै नमः ।

सोपाने:

पूर्वे ॐ आत्मने नमः । दक्षिणे ॐ अंतरात्मने नमः ।

पश्चिमे ॐ परमात्मने नमः । उत्तरे ॐ ज्ञानात्मने नमः ।

पूर्वादि कमलाष्ठ पत्रेषु:

छत्र धारिण्यै ॐ विमलायै नमः । चामर धारिण्यै ॐ उत्कर्षिण्यै नमः । व्यजन धारिण्यै ॐ ज्ञानायै नमः । दर्पण धारिण्यै ॐ क्रियायै नमः । गान कर्त्यै ॐ योगायै नमः । नृत्यत्यै ॐ प्रह्व्यै नमः । वाद्यहस्तायै ॐ सत्यायै नमः । स्तोत्र कर्त्यै ॐ ईशानायै नमः । येताभिः कृत सेवां समर्पयंत्यै मध्ये ॐ अनुग्रहायै नमः । अनुग्रहाक्त्य शक्तौ सहस्र फणा मंडल मंडिताय तल्पाकाराय हरेर् योगासन रूपाय ॐ श्रीमदनंताय नमः ।

तदुपरि ॐ रमा रूप चित्रासनाय नमः ।

(इति एकैकवारं पुष्पं समर्पयेत्)

ॐ आत्मादेवानामनिलो वातायनः वायुस्त्रिष्टुप् । आवाहने विनियोगः ॥ (१०.१६०.४)

ॐ॥ आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।

घोषा इदस्य शृण्विरेन रूपं तस्मै वाताय हविषा विधेम ॥

ॐ नमो नारायणाय । एह्येहि देव हृत् पद्मस्थित श्रीपुरुषोत्तम आवाहयामि पीठेत्वां प्रतिमायां रमापते ।

(द्विरुच्छार्य) ॐ नमो नारायणाय । एह्येहि देव हृत् पद्मस्थित श्रीपुरुषोत्तम आवाहयामि पीठेत्वां प्रतिमायां

रमापते । देवं सुषुम्ना मार्गेण ब्रह्म रंध्रेणानीय दक्षिण नासा पुटेन बहिर् निर्गत  स्वांजलिस्थित तुलसी पुष्पेषु सन्निहितं स्वस्वा ऽ भीष्ठप्रद श्रीरामकृष्ण व्यास हयग्रीवादि तत्तन् मूर्तीन् ध्यात्वा ॥

॥ ध्यानम् ॥

ॐ ॥ उद्यद् भास्वत् समा भास श्चिदानंदैक देहवान् ।

चक्र शंख गदा पद्म धरो ध्येयोह मीश्वरः ॥

लक्ष्मीधराभ्या माश्लिष्पः स्वमूर्ति गण मध्यगः ।

ब्रह्म वायु शिवा हीश विपैः शक्रादि कैरपि ॥

सेव्य मानोधिकं भक्त्या नित्य निश्येष शक्तिमान् ।

मूर्तयोऽवपि ध्येयंश्चक्र शंख वराभयैः ॥

तत्र तत्र स्थितं विष्णुं तत्तन् मूर्ति गते नवै ।

एकी भूतं चिंतयित्वा तद्रूपं व्याप्त रूपतः ॥

व्याप्तं तद्बिंब रूपेण बिंब मर्चा गते नवै ।

एकी भूतं चिंतयित्वा भक्तिमान् पूजयाम्यहं ॥

स्वातंत्र्याद् देश कालादि व्यवधानोज्झि तत्वतः ।

स्थित्वैव तत्त त् स्थानेषु स्वपूज्य प्रतिमास्थितम् ॥

भावयेत् सच्चिदानंद सांद्र सुंदर विग्रहं ।

नखादि केश पर्यंतम् रूपानंत्येन संयुतम् ॥

मद् गुरूक्तानु सारेण चिंतयेहं यथामति ।

(इति ध्यात्व)

एह्येहि । मम हृत्पद्मस्थितं श्रीनृसिंह प्राज्ञ हरिनामक रूपत्रयात्मकं बिंबरूपिणं श्रीरामकृष्ण वेदव्यासाद्यनंतावतार रूपावयव गुण क्रियात्मकम् भगवंतं श्रीलक्ष्मीनारायणं पीठस्थितै तद्धातुमय प्रतिमां तत् स्थित तेजस्सारमय प्रतिमां तत् स्थित श्री मुख्यप्राण प्रतिमा मध्ये रमया सह क्षीर नीरव दासीन स्व प्रतिमाया मावाहयामि ।

(आवाहन मुद्रां प्रदर्श्य – पादयोः पुष्पांजलीं समर्प्य)

प्रार्थनाः

ॐ ॥ सानिध्यं कुरु देवेश सर्व संपत्करो भव ।

विभो सकल लोकेश विष्णोजिष्णो हरे प्रभो ॥


त्वां भक्त्या पूजयाम्यद्य भोगैः अर्घ्याधिभिः क्रमात् ।

यागावसान पर्यंतं अत्र स्थित्वा जनार्दन ॥

भक्तस्य मम पूजांच गृहीत्वा पाहिमां प्रभो ।

भो स्वामिन् जगतां नाथ यावत् पूजावसानकं ॥

तावत् संप्रीति भावेन बिंबेस्मिन् सन्निधोभव । (प्रार्थनी मुद्रया संप्रार्थ्य)



ॐ नमो नारायणाय । आवाहितो भव ।

संस्थापितो भव । सन्निहितो भव ।

सन्निरुद्धो भव । सम्मुखो भव । अवगुंठितो

भव । (इति षण्मुद्राः प्रदर्श्य – देवपाद हृदय मस्तकेषु अष्टाक्षर, विष्णुषडक्षर, वासुदेव द्वादशाक्षरैरभिमृश्य ॥ विष्णु प्रतिमायां गोलकद्वितयं, वैष्णव प्रतिमायां गोलक त्रितयं ध्यायेत् – प्रतिमायां सन्निधानार्थं तत्वन्यास, मातृकान्यास, कृष्चोल्कादि न्यासा दीन् कृत्व । मूल मंत्रं अष्टोत्तर शतवारं (यथाशक्ति), तत्तन् मूर्ति मंत्रं जपेत्)

ॐ सालिग्राम शिलायां वै स्वयं व्यक्त स्तथैवच ।

बिंब मूर्त्या सहैक्येन तदंतश् चिंतयेद्धरिं ॥

ॐ उत्तिष्ठ ब्रह्मणस्पते इत्यस्य काण्वोघौरः ब्रह्मणस्पतिर्बृहती । प्रार्थने विनियोगः ॥(१.४०.१)

ॐ॥ उत्तिष्ठ ब्रह्मणस्पते देवयंत स्त्वे महे ।

उपप्रयंतु मरुतः सुधानव इंद्र प्राशूर्भवा सचा ॥

एहि श्री भगवन् विष्णो स्नानार्थं मज्जनालयं ॥ (इति प्रार्थ्य)

इदं विष्णुर्मेधातिथिविष्णुर्गायत्री । पादुकार्पणे विनियोगः ॥ (१. २२. १७)

ॐ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळ्हमस्य पांसुरे ॥

ॐ नमो नारायणाय । (पादुके समर्पयामि)

ॐ भद्रं कर्णेभिरिति गोतमो राहूगणो विश्वेदेवास्त्रिष्टुप् । प्रार्थने विनियोगः ॥ (१.८९.८)

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरंगै स्तुष्टुवां सस्तनूभिर्व्यशेम देवहितं यदायुः ॥

ॐ नमोनारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

ॐ नमो नारायणाय लक्ष्मी हस्तेन शंखोदकेन अर्घ्यं समर्पयामि ॥

ॐ नमो नारायणाय सरस्वती हस्तेन पाद्यं समर्पयामि ॥

ॐ नमो नारायणाय रति हस्तेन आचमनं समर्पयामि ॥

ॐ नमो नारायणाय पितामह हस्तेन मधुपर्कं समर्पयामि ॥

ॐ नमो नारायणाय शांति हस्तेन पुनराचमनं समर्पयामि ॥

॥ अथ पंचामृताभिकः ॥

ॐ आप्यायस्वेति गौतम स्सोमो गायत्री। क्षीराभिषेके विनि ॥(१–९१–१६ हागू ९–३१–४)

ॐ॥ आप्यायस्व समेतुते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥

(ॐ नमो नारायणाय । क्षीरेण स्नपयामि)

ॐ दधिक्राव्णो वाम देवो दधिक्राव्णा आनुष्टुप् । दध्नाभिके विनियोगः (४–३९–६)

ॐ॥ दधिक्राव्णो अकारिषं जिष्णो रश्वस्य वाजि नः ।सुरभिनो मुखा करत्प्रण आयूंषि तारित् ॥

(ॐ नमो नारायणाय । दध्नास्नपयामि)

ॐ घृतं मिमिक्षेत्यस्य गृत्समद आप्रं त्रिष्टुप् ॥ घृताभिषेके विनियोगः ॥ (२–३–११)

ॐ॥ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम् वस्य धाम ।

अनुधमा वह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम् ॥

(ॐ नमो नारायणाय । घृतपर्क स्नानं समर्पयामि )

ॐ मधुवाता रहूगणो गौतमो विश्वेदेवा गायत्री । मधुपर्कस्नाने विनियोगः ॥ (१–९०–६)

ॐ॥ मधु वाता ऋतायते मधुक्षरंति सिंधवः । माध्वीर्नः संत्वोषधीः ॥१॥

मधु नक्त मुतोषसो मधुमत्पार्थिवं रजः । मधुद्यौरस्तु नः पिता ॥२॥

मधुमान्नो वनस्पतिर्मधुमान् अस्तु सूर्यः । माध्वीर्गावो भवंतु नः॥ ३॥

(ॐ नमो नारायणाय । मधुपर्क स्नानं समर्पयामि)

ॐ स्वादुः पवस्वेत्यस्य भार्गव स्सोमो जगति । शर्कराभिषेके विनियोगः ॥ (९–८५–६)

ॐ॥ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुहवीतु नाम्ने ।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमान् अदाभ्यः ॥

(ॐ नमो नारायणाय । शर्करास्नपयामि)

ॐ याः फलिनीरित्यस्य अथर्वणोभिषघोषधयोऽनुष्टुप् । फलाभिषेके विनियोगः ॥ (१०–९७–१५)

ॐ॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुंचंत्वं हसः ॥

(ॐ नमो नारायणाय । फलोदकेनस्नपयामि)

ॐ आपोहिष्टेति त्यृचस्य अंबरीषोवा आपो गायत्री ॥ मार्जने विनियोगः ॥ (१०–९–१)

ॐ॥ आपोहिष्टा मयोभुव स्तान ऊर्जे दधातन । महे रणाय चक्षसे ॥ १ ॥

योवः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः ॥ २ ॥

तस्मा अरंग माम वो यस्य क्षयय जिन्वथ । आपो जनयथा च नः ॥ ३ ॥

॥ ॐ शांतिः शांतिः शांतिः ॥

॥ श्री पुरुषसूक्तेन महाभिषेकं कुर्यात् ॥

ॐ ॥ सहस्रशीर्षेति षोळषर्चस्य सूक्तस्य । नारायण ऋषिः । अनुष्टुप् छंदः । अंत्या त्रिष्टुप् छंदः ।

परमपुरुषो देवता । पुरुषसूक्त मंत्राभिषेके विनियोगः ॥ (१०–९०–१)

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।

स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलं ॥ १०.०९०.०१ ॥

पुरुष एवेदं सर्वं । यद्भूतं यच्च भव्यं ।

उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ १०.०९०.०२ ॥

एतावानस्य महिमाऽतो ज्यायाश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥ १०.०९०.०३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहा भवात्पुनः ।

ततो विश्वं व्यक्रामत् । साशना नशने अभि ॥ १०.०९०.०४ ॥

तस्माद्विराडजायत । विराजो अधि पूरुषः ।

स जातो अत्यरिच्यत । पश्चाद्भूमि मथो पुरः ॥ १०.०९०.०५ ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।

वसंतो अस्यासीदाज्यं । ग्रीष्म इध्मः श्शरद्धविः ॥ १०.०९०.०६ ॥

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

तेन देवा अयजंत । साध्या ऋषयश्च ये ॥ १०.०९०.०७ ॥

तस्मात् यज्ञात्सर्वहुतः । संभृतं पृषदाज्यं ।

पशूगस्तागश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ॥ १०.०९०.०८ ॥

तस्मात् यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।

छंदांसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ १०.०९०.०९ ॥

तस्मादश्वा अजायंत । ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ १०.०९०.१० ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ १०.०९०.११ ॥
ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्यां शूद्रो अजायत ॥ १०.०९०.१२ ॥
चंद्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ १०.०९०.१३ ॥
नाभ्या आसीदंतरिक्षं । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोतात् । तथा लोकाग्ं अकल्पयन् ॥ १०.०९०.१४ ॥
सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना ः । अबध्नन् पुरुषं पशुं ॥ १०.०९०.०५ ॥
यज्ञेन यज्ञमयजंत देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचंते । यत्र पूर्वे साध्याः संति देवाः ॥ १०.०९०.१६ ॥

ॐ शांतिः शांतिः शांतिः ॥

ॐ अतोदेव इति काण्वो मेधातिथि विष्णुर् गायत्री ॥ (अभिषेके विनियोगः) ॥

ॐ॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ १ ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळ्हमस्य पांसुरे ॥ २ ॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ ३ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इंद्रस्य युज्यः सखा ॥ ४ ॥
तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततम् ॥ ५ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिंधते । विष्णोर्यत्परमं पदम् ॥ ६ ॥

ॐ विश्वतः चक्षुरिति विश्वकर्मा भौवनः । विश्वकर्मास्त्रिष्टुप् ॥ (१०–८१–०३)

ॐ ॥ विश्वतः चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः स्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर् द्यावा भूमी जनयं देव एकः ॥ ७ ॥

ॐ॥ संसृष्टं धनमुभयं समाकृतमस्मभ्यम् दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयें शत्रवः पराजिता सो अप नि लयंताम् स्वस्ति ॥ ८ ॥

॥ ॐ शांतिः शांतिः शांतिः ॥

ॐ नमो नारायणाय । अमृताभिषेको अस्तु ॥

ॐ युवं वस्त्रा णिरिति धीर्घतमा औचथ्यः मित्रा वरुणा स्त्रिष्टुप् । वस्त्र समर्पणे विनियोगः ॥(१–१५२–१)

ॐ॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंतवो ह सर्गाः ।
अवातिरत मनृतानि विश्व ऋतेन मित्रा वरुणा सचेथे ॥

ॐ नमो नारायणाय । दिव्य पीतांबर वस्त्रं समर्पयामि ॥

ॐ हिरण्य रूपेत्यस्य गृत्समदः अपांनपात्रिष्टुप् । आभरण समर्पणे विनियोगः । (२–३५–१०)

ॐ॥ हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात् परि योनेर् निद्या हिरण्यदा ददत्यन्नमस्मै ॥

ॐ नमो नारायणाय । कौस्तुभाद्याभरणानि समर्पयामि ॥

ॐ यज्ञोपमीतमित्यस्य परब्रह्म परमात्मा स्त्रिष्टुप् । यज्ञोपवीत समर्पणे विनियोगः ॥ (ब्रह्मोपनिषत्)

ॐ॥ यज्ञोपवीतम् परमं पवित्रं प्रजापते र्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यम् प्रति मुंच शुभ्रं यज्ञोपवीतम् बलमस्तु तेजः ॥

ॐ नमो नारायणाय । यज्ञोपवीतं समर्पयामि ॥

ॐ गंधद्वारामिति आनंद कर्दमश्चिक्लीतेंदिरानुष्टुप् । गंध समपणे विनियोगः ॥ (पंचम मंडलांते –खिल मंत्र)

ॐ ॥ गंधद्वारां दुराधषां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामि होपह्वये श्रियम् ॥

ॐ नमो नारायणाय । गंधान् धारयामि ॥

ॐ आयनेते इत्यस्य स्तंबमित्ररग्निरनुष्टुप् । अक्षत समर्पणे विनियोगः ॥ (१०–१४२–८)

ॐ ॥ आयनेते परायणे दूर्वा रोहंतु पुष्पिणीः ।
ह्रदाश्च पुंडरीकाणि समुद्रस्य गृहा इमे ॥

ॐ नमो नारायणाय । अलंकरणार्थे अक्षतां समर्पयामि ॥

माल्यादीनि सुगंदीनि मालित्यादि निवै प्रभो । मया हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां ॥

ॐ नमो नारायणाय । दिव्य परिमळ पत्र पुष्पाणि समर्पयामि ॥

ॐ श्री केशवाय नमः – – – – – ॐ श्री कृष्णाय नमः ॥

ॐ मत्स्याय नमः ॥ ॐ कूर्माय नमः ॥ ॐ वराहाय नमः ॥

ॐ नारसिंहाय नमः ॥ ॐ वामनाय नमः ॥ ॐ भार्गवरामाय नमः ॥

ॐ श्रीरामाय नमः ॥ ॐ श्री कृष्णाय नमः ॥ ॐ बुद्धाय नमः ॥ ॐ
कल्किने नमः ॥ इष्प देवतात्मक कुलदेवतात्मक कामितार्थप्रद
श्री लक्ष्मीवेंकटेश्वराय नमः ॥ (श्रीविष्णुसहस्रनामम्. श्रीब्रह्मसूत्र भाष्यं, इत्यादि पठेत्)

॥ अथ आवरण पूजा ॥

मध्ये ॐ परम पुरुषाय नमः ॥

वामे ॐ लक्ष्म्यै नमः ॥

दक्षे ॐ धराय नमः ॥

पीठाद्बहिः – पूर्वे ॐ क्रुद्धोल्काय नमः ।

दक्षिणे ॐ महोल्काय नमः ।

पश्चिमे ॐ वीरोल्काय नमः ।

उत्तरे ॐ द्यूल्काय नमः ।

ॐ सहस्रोल्काय नमः ॥

(ॐ नमो नारायणाय इति प्रथमावरण पूजां समर्पयामि)

तद्बहिः पूर्वादिदिक्षुः – ॐ वासुदेवाय नमः ।

दक्षिणे ॐ संकर्षणाय नमः ।

पश्चिमे ॐ प्रद्युम्नाय नमः ।

उत्तरे ॐ अनिरुद्धाय नमः ॥

आग्नेयादि चतुष्कोणेषु –ॐ मायायै नमः ।

नैऋत्ये ॐ जयायै नमः ।

वायव्ये ॐ कृत्यै नमः ।

ऐशान्ये ॐ शांत्यै नमः ॥

(ॐ नमो नारायणाय इति द्वितीयावरण पूजां समर्पयामि)

तद्बहिः – पूर्वे ॐ केशवाय नमः । ॐ नारायणाय नमः ।

आग्नेये ॐ माधवाय नमः ।

दक्षिणे ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।

नैऋत्ये ॐ मधुसूदनाय नमः ।

पश्चिमे ॐ त्रिविक्रमाय नमः । ॐ वामनाय नमः।

वायव्ये ॐ श्रीधराय नमः ।

उत्तरे ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।

ऐशान्ये ॐ दामोदराय नमः ॥

(ॐ नमो नारायणाय इति तृतीयावरण पूजां समर्पयामि)

तद्बहिः – पूर्वे ॐ संकर्षणाय नमः । ॐ वासुदेवाय नमः ।

आग्नये ॐ प्रद्युम्नाय नमः ।

दक्षिणे ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।

नैऋत्ये ॐ अधोक्षजाय नमः ।

पश्चिमे ॐ नारसिंहाय नमः । ॐ अच्युताय नमः ।

वायव्ये ॐ जनार्दनाय नमः ।

उत्तरे ॐ उपेंद्राय नमः । ॐ हरये नमः ।

ऐशान्ये ॐ श्रीकृय नमः ॥

(ॐ नमो नारायणाय इति चतुर्थावरण पूजां समर्पयामि)

तद्बहिः – पूर्वे ॐ मत्स्याय नमः । ॐ कूर्माय नमः ।

आग्नेये ॐ वराहाय नमः ।

दक्षिणे ॐ नारसिंहाय नमः । ॐ वामनाय नमः ।

नैऋत्ये ॐ परशुरामाय नमः ।

पश्चिमे ॐ रामाय नमः । ॐ श्री कृष्णाय नमः ।

वायव्ये ॐ बुद्धाय नमः ।

उत्तरे ॐ कल्किने नमः । ॐ अनंताय नमः ।

ऐशान्ये ॐ विश्वरूपाय नमः ॥

(ॐ नमो नारायणाय इति पंचमावरण पूजां समर्पयामि)

तद्बहिः पूर्वादिक्षु – ॐ अनंताय नमः ।

दक्षिणे ॐ ब्रह्मणे नमः ।

पश्चिमे ॐ वायवे नमः ।

उत्तरे ॐ ईशानाय नमः ।

देवस्याग्रे ॐ गरुडाय नमः ॥

आग्नयादिविदिक्षु ॐ वारुण्यै नमः ।

नैऋत्ये ॐ सरस्वत्यै नमः ।

वायव्ये ॐ भारत्यै नमः ।

ऐशान्ये ॐ गिरिजायै नमः ॥

गरुडस्यवामे ॐ सौपर्णी नमः ॥

(ॐ नमो नारायणाय इति षष्ठावरण पूजां समर्पयामि)

तद्बहि पूर्वे–सुराधिपतये ॐ लां इंद्राय पीतवर्णाय वज्रहस्तायु

ऐरावत वाहनाय शची सहिताय श्रीविष्णु पार्षदाय नमः ॥

आग्नेये–तेजोधिपतये ॐ रां अग्नये रक्तवर्णाय शक्तिहस्ताय

मेष वाहनाय स्वाहा सहिताय श्रीविष्णु पार्षदाय नमः ॥

दक्षिणे– धर्माधिपतये ॐ यां यमाय कृष्णवर्णाय दंड हस्ताय

महिष वाहनाय श्यामला सहिताय श्रीविष्णु पार्षदाय नमः ॥

नैऋत्ये–रक्षोधिपतये ॐ क्षां निरऋतये धूम्रवर्णाय खड्गहस्ताय

प्रेत वाहनाय दीर्घग्रीवा सहिताय श्रीविष्णु पार्षदाय नमः ॥

पश्चिमे–जलाधिपतये ॐ वां वारुणाय शुभ्रवर्णाय पाशहस्ताय

मकर वाहनाय काळिका सहिताय श्रीविष्णु पार्षदाय नमः ॥

वायव्ये–ज्ञानाधिपतये ॐ यां वायवे धूम्रवर्णाय अंकुश हस्ताय

मृग वाहनाय मोहिनी सहिताय श्रीविष्णु पार्षदाय नमः ॥

उत्तरे–धनाधिपतये ॐ सां सोमाय शुक्ल वर्णाय कुमुदहस्ताय

तुरग वाहनाय रोहीणी सहिताय श्रीविष्णु पार्षदाय नमः ॥

ऐशान्ये–भूताधिपतये ॐ हां रुद्राय स्वच्छ वर्णाय शूलहस्ताय

वृषभ वाहनाय उमा सहिताय श्रीविष्णु पार्षदाय नमः ॥

निऋति वरुणयोर्मध्ये– नागाधिपतये ॐ आं शेषाय गौरवर्णाय

चक्रहस्ताय कूर्म वाहनाय वारुणी सहिताय श्रीविष्णु पार्षदाय नमः ॥

इंद्रेशानयोर्मध्ये– सत्याधि सर्व लोकाधिपतये ॐ ह्रीं ब्रह्मणे

पद्महस्ताय हंस वाहनाय सरस्वती सहिताय श्रीविष्णु पार्षदाय नमः ॥

तन्मध्ये एकीभूतस्वावताराय सस्त्रीकाय सपरिवाराय शंख चक्र गदा पद्म वनमाला

कौस्तुभ भूषित दिव्य पीतांबरधारी नीलमेघश्याम भगवान् श्रीलक्ष्मीनारायणाय नमः ॥

(समस्त आवरण देवताभ्यो नमः)

॥ धूप दीप समर्पणं ॥

धूपः ॥ ॐ वनस्पत्युद्भवो दिव्यो गंधाढ्यो गंध उत्तमः ।

आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यतां ॥

ॐ नमो नारायणाय धूप माघ्रापयामि ॥

दीपं ॥ ॐ साज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया ।

दीपं गृहाण देवेश त्रैलोक्य तिमिरा पहा ॥

भक्त्यादीपं प्रयच्छामि देवाय परमात्मने ।

त्राहिमां निरयाद्घोर दिव्य ज्योतिर्नमोस्तुते ॥

ॐ नमो नारायणाय एकार्तिक्य दीपं दर्शयामि ॥

॥ द्वादशस्तोत्रं ॥

ॐ॥ वंदे वंद्यं सदानंदं वासुदेवं निरंजनं ।

इंदिरा पतिमाद्यादि वरदेश वरप्रदम् ॥ १ ॥

नमामि निखिलाधीश किरीटा घृष्टपीठवत् ।

हृत्तमः शमनेकार्भं श्रीपतेः पाद पंकजम् ॥ २ ॥

जांबून दांबरा धारं नितंबं चिंत्य मीशितुः ।

स्वर्ण मंजीर संवीतमारूढं जगदंबया ॥३॥

उदरं चिंत्य मीशस्य तनुत्वे ऽ प्यखिलंभरं ।

वलित्रयांकितं नित्यमुपगूढं श्रीयैकया ॥ ४ ॥

स्मरणीयमुरो विष्णोरिंरावास मुत्तमम् ।

अनंतमंतवदिव भुजयोरंतरंगतम् ॥ ५ ॥

शंख चक्र गदा पद्म धराश्चिंत्या हरेर्भुजाः ।

पीनवृत्ता जगद्रक्ष्या केवलोद्योगि नोऽनिशम् ॥ ६ ॥

संततं चिंतयेत् कंठं भास्वत् कौस्तुभ भासकम् ।

वैकुंठस्या ऽ खिला वेदा उद्गीर्यंतेऽनिशं यतः ॥ ७ ॥
स्मरेत यामिनीनाथ सहस्रा मितकांतिमत् ।
भवता पापनोदीड्यं श्रीपतेर्मुख पंकजं ॥ ८ ॥
पूर्णानन्य सुखोद्भासि मंदस्मित मधीशितुः ।
गोविंदस्य सदा चिंत्यं नित्यानंद पदप्रदम् ॥ ९ ॥
स्मरामि भवसंताप हानिदामृत सागरम् ।
पूर्णानंदस्य रामस्य सानु रागावलोकनं ॥ १० ॥
ध्यायेदजस्र मीशस्य पद्मजादि प्रतीक्षितमम् ।
भ्रूभंगं पारमेष्ट्यादि पददायि विमुक्तिदं ॥ ११ ॥
संततं चिंतयेऽनंतमंत काले विषेशतः ।
नैवोदा पुर्गृणंतोऽतं यद्गुणानामजादयः ॥ १२ ॥
(इति श्रीमदानंदतीर्थ भगवत्पादाचार्य विरचिते द्वादश स्तोत्रे प्रथमोध्यायः)

॥ अथ नैवेद्य समर्पणं ॥

दक्षिणभागे पानीयोदकादीनि निदाय । प्रणवेनाभिघार्य तुळसीदळं निधाय । प्रोक्षनीयोदकं हस्ते गृहीत्वा। (देवॆरॆदुरु बलभागदल्लि चतुरस्र मंडल माडि रंगवल्लियिंद अष्टदळ पद्म बॆरॆदु मध्ये ॐ कार बॆरॆदु अदर ऎड बल पार्श्वगळल्लि श्रीकार बॆरॆदु नैवेद्यक्के इडबेकु. "श्रीं ॐ श्रीं" ऎंदु श्री बीजमंत्रवन्नु बॆरॆदु अदर मॆलॆ नैवेद्यवन्निट्टु आग्नेयदल्लि भक्ष्य, ऐशान्यदल्लि परमान्न, वायुव्यदल्लि शाकादि, नैरुत्यदल्लि तॊव्वॆ, मध्यदल्लि अन्न, अन्नपायसगळ नडुवॆ घृत पात्रॆगळन्निट्टु, मत्तॊंदु मंडलदल्लि लवण शाकादिगळन्निट्टु, पानीयजल घृत तांबुलादिगळन्निट्टु, नैवेद्य वस्तुगळल्लि "ॐ" ऎंदु घृतदिंद अभिघार माडि, तुलसी दळगळन्नु हाकि, नैवेद्यार्थ प्रत्येक जलवन्नु ऒंदु बॆरॆ सण्ण पात्रॆयल्लि जलवन्नु तुंबिसि तुळसीदळवन्नु हाकि, विष्णु गायत्री मत्तु गायत्रियिंद अभिमंत्रिसि , ताक्ष्यादि मुद्रॆगळिंद अभिमंत्रिसि, विपुलीकरणर्थ धेनुमुद्रां, शीतलार्थे चंद्र मुद्रॆगळन्नु तोरिसि "ॐ नमो नारायणाय" ऎंदु ऎंटु सल मंत्रिसि " ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।तन्नो विष्णुः प्रचोदयात् ॥ " ऎंदु नैवेद्यक्के प्रोक्षिसि)




अमृतीकरणाथं धेनुमुद्रां प्रदर्शयामि ।

पवित्रीकरणार्थं शंखमुद्रां प्रदर्शयामि ।

संरक्षणार्थं ॐ सुदर्शनाय हुंफट् स्वाहा चक्रमुद्रां प्रदर्शयामि ।

निर्विषीकरणार्थं ताक्ष्र्य मुद्रां प्रदर्शयामि ।

अभिवृद्ध्यर्थं गिरिमुद्रां प्रदर्शयामि ।

शैतलार्थं शशिमुद्रां प्रदर्शयामि ।

ॐ नमो नारायणाय ।

ॐ भूर्भुवस्वः । तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो योनः प्रचोदयात् ॥

सत्यंत्वर्तेन परिषिंचामि । अमृतमस्तु । कामधेनुं स्मरामि । सपरिवाय

श्रीलक्ष्मीनारायणाय नैवेद्यं समर्पयामि । ॐ अमृतोपस्तरणमसि स्वाहा ।

ॐ ॥ महालक्ष्मी समेतस्य विष्णोते दक्षिणेकरे ।

आपोशनं दीयमानं पिबदेव रमापते ॥

सुधारसं सुविपुलं आपोशन मिदंतव ।

गृहाणत्वं सुरश्रेष्ठ यथे मुप भुज्यताम् ॥

(ऍंदु लक्ष्मीहस्तदिंद आपोशन कॊट्टु आ जलवन्नु अर्घ्य पात्रदल्लि हाकि)

ॐ प्राणाय स्वाहा । प्राणात्मने श्रीनारायणाय इदन् नमम ।

ॐ अपानाय स्वाहा । अपानात्मने श्रीवासुदेवाय इदन् नमम ।

ॐ व्यानाय स्वाहा । व्यानात्मने श्रीसंकर्षणाय इदन् नमम ।

ॐ उदानाय स्वाहा । उदानात्मने श्रीप्रद्युम्नाय इदन् नमम ।

ॐ समानाय स्वाहा । समानात्मने श्रीअनिरुद्धाय इदन् नमम ।

तत् शंखोदकं अमृतधारया पात्रांतरे निक्षिप्य ।

(अर्घ्योदकवन्नु समर्पिसि तुळसीदळवन्नु कैयल्लि हिडिदु अंजली मुद्रेयिंद)

सौवर्णे स्थालिवर्ये मणिगणखचितैः गोघृताक्तान् सुपक्वान् ।

भक्ष्यान् भोज्यांश्च लेह्यानपरमपि महच्चोष्य मन्नं निधाय ॥

नाना शाकैरुपेतं दधिमधु सुघृतं क्षीरपानीय युक्तं ।

तांबूलंचापि विष्णोः प्रतिदिवसमहं मानसे चिंतयामि ॥

अद्यतिष्ठति यत्किंचित् कल्पितं चापरं गृहे ।

पक्व मन्नं सपानीयं सर्वोपस्कर संयुतं ॥

यथाकालं मनुष्यादै र्भोक्ष्यमाणं सुरैरपि ।

तत्सर्वं विष्णुपूजास्तु प्रीयतां मे जनार्दनः ॥

अन्नानि पायस मुखानि विशुद्धिमंति स्निग्धानि सत् कदलि मोदक संभृतानि ।

सर्पिर् गुडैर् मधुभिरार् द्रतमानि भूयः स्वामिन् समर्पितमिदं हि नमो नमस्ते ॥ नैवेद्यं पायसं भक्ष्यं नानाशाकैः समन्वितं ।

हविष्यं घृतपक्वं च फलानि विविधानि च ॥

श्रीनिवास नमस्तुभ्यं महा नैवेद्य मुत्तमं ।

नित्य तृप्त गृहाणेद कृपया भक्त वत्सल ॥

भगवन् श्रीपतेन्यस्तम् नैवेद्यं तत् पुरोमया ।

कपिलात्मक दिव्येन चक्षुषात्वं विलोकया ॥

कृत्वा पवित्रं पूर्ण च साधु स्वादु रसैर्युतम् ।

नृसिंहात्मक रूपेण दिव्य घ्राणेंद्रियेणतु ॥

तद्वस्तु निष्ठ गंधं च दिव्यमाजिघ्र चिन्मय ।

भृगुराम स्वरूपेण दिव्य वागिंद्रियेणतु॥

कूर्म रूपेण दिव्य जिह्वेंद्रियेणतु ।

आस्वादय स्वादु रसं भुंक्ष्यदेव रमापते ॥

अगणय्या पराधान्मे प्रसादं कुरुकेशव ॥

ॐ ॥ रसो वै सः । रसं ह्येवायं लब्ध्वानंदी भवति ।

ॐ ॥ पूर्णमदः पूर्णमिदं पूर्णात् पूर्ण मुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्ण मेवावशिष्यते ॥

ॐ रमा ब्रह्मादिभिर् देवै नियमेन समर्पितं ।

भक्त्यानुग्रह कामेन स्वीकर्तव्यं त्वया हरे ॥

ॐ नमो नारायणाय सर्वोपस्कर संयुतं महानैवेद्यं समर्पयामि ।

मध्ये मध्ये पानीयं समर्पयामि ।

ॐ ॥ महालक्ष्म्यादीयमानं करेते दक्षिणेऽनघ ।

उत्तरापोशनं दिव्यं पिबदेव रमापते ॥

ॐ नमो नारायणाय । ॐ अमृतापिधानमसि स्वाहा ।

सश्रीकाय सपरिवाराय स्वाहा ।

ॐ नमो नारायणाय । हस्त प्रक्षाळनं समर्पयामि ।

ॐ नमो नारायणाय । पादप्रक्षाळनं समर्पयामि ।

ॐ नमो नारायणाय । करोद्वर्तनं समर्पयामि ।

ॐ नमो नारायणाय । दंतशोधनं समर्पयामि ।

ॐ नमो नारायणाय । गंडूषान् समर्पयामि ।

ॐ नमो नारायणाय । मुख वस्त्रं समर्पयामि ।

ॐ नमो नारायणाय । आचमनं समर्पयामि ।

ॐ नमो नारायणाय । पुनराचमनं समर्पयामि ।

पूगीफल समायुक्तं नागवल्ली दलैर्युतं । कर्पूरचूर्ण संयुक्तं तांबूलं प्रतिगृह्यतां ॥

ॐ नमो नारायणाय । क्रमुक तांबूलं समर्पयामि ।

ॐ नमो नारायणाय । सुवर्ण पुष्प दक्षिणां समर्पयामि ।

ॐ नमो नारायणाय । पुनर्धूपं समर्पयामि ।

॥ एकादश्यां नैवेद्य समर्पणप्रकारः ॥

नागरं शर्करायुक्तं एलाघृत विमिश्रितं । नारिकेळ फलंचैव फलं स्वादु रसात्मकं ॥ द्राक्षाजंभीर चूतानि कपित्थामलके कथा । दाडिमं पनसं पक्वमुर्वारुक रसायनं ॥ बदरी जंबु निंबानि मुद्गानि चणकानि च । तिल तंडुल पिष्टंच एलाघृत विमिश्रितं ॥

पंचखाद्यं दधिक्षीरं नवनीतं शुभावहं । गंगोदकं च पानीयम् शुभ वासनया युतं ॥ नित्यतृप्तेंदिराद्य गृहाण कमलापते । इति प्रसाद्य देवेशं एकादश्यां समर्पयेत् ॥

॥ अथ महानीराजनं ॥

ॐ अर्चत प्रार्चतेत्यस्य प्रियमेधरिंद्रोऽनुष्टुप् । नीराजने विनियोगः ॥(८–६९–९)

ॐ ॥ अर्चत प्रार्चत प्रिय मेधासो अर्चत ।

अर्चंतु पुत्रका उत पुरं न दृष्ण्वर्चत ॥ ॐ॥

जयति हरिरचिंत्यः सर्वदेवैक वंद्यः परम गुरुरभीष्टा वाप्तिदः सज्जनानां ।

निखिलगुणगणार्णो नित्य निर्मुक्त दोषः सरसिजनयनोऽसौ श्रीपतिर्मानदोनः ॥ १ ॥

ॐ जयत्य जोऽखंड गुणोरु मंडलः सदोदितो ज्ञान मरीचिमालि ।

स्वभक्त हार्दोच्च तमोनिहंता व्यासावतारो हरिरात्म भास्करः ॥ २ ॥

जयत्य जो ऽ क्षीण सुखात्मबिंबः स्वैश्वर्यकांति प्रततः सदोदितः ।

स्वभक्त संताप दुरिहंता रामावतारो हरिरीश चंद्रमाः ॥ ३ ॥

जयत्य संख्योरु बलांबु पूरो गुणोच्च रत्नाकर आत्म वैभवः ।

सदा सदाऽत्मज्ञ नदीभिराप्यः कृष्णावतारो हरिरेक सागरः ॥ ४ ॥

श्रिये जातेत्यस्य काण्वो सोमस्त्रिष्टुप् । नीराजने विनियोगः । ( ९–९४–४ )

ॐ ॥ श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।

श्रियं वसाना अमृतत्व मायन् भवंति सत्य समिथा मित द्रौ ॥

श्रिय एवैनं तच्छ्रिय मा दधाति । संततं मृचा वषट्कृत्यं संतत्यै

संधीयते । प्रजया पशुभिः । य एवं वेद ॥

ॐ नमो नारायणाय । उत्तरमंगल नीराजनं दर्शयामि ।

॥ मंत्र पुष्पं ॥

ॐ॥ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे ।

समे कामान् काम कामाय मह्यं । कामेश्वरो वै श्रवणो ददातु ।

कुबेराय वैश्रवणाय । महाराजाय नमः । यो वै तां ब्रह्मणो वेद ।

अमृतेना वृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजांददुः ।

तासा माविर भूच्चौरिः स्मयमान मुखां भुजः ।

पीतांबर धरः स्रग्वी साक्षान् मन्मथ मन्मथः ॥

ॐ योनः पितेत्यस्य विश्वकर्मा भौवनः विश्वकर्मा स्त्रिष्टुप् ॥ नीराजने विनियोगः ॥ (१०–८२–३)

ॐ॥ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।

यो देवानां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या ॥ स्वस्ति ॥

ॐ नमो नारायणाय । वेदोक्त मंत्र पुष्पांजलिं समर्पयामि ।

छत्रं समर्पयामि, चामरं समर्पयामि, व्यजनं समर्पयामि, दर्पणं

समर्पयामि, नृत्यं समर्पयामि, गीतं समर्पयामि , वाद्यं समर्पयामि,

स्तोत्रं समर्पयामि, पुराण श्रवणं समर्पयामि, पंचांग श्रवणं

समर्पयामि, आंदोळिकारोहणं समर्पयामि, अश्वारोहणं समर्पयामि,

गजारोहणं समर्पयामि, समस्त राजोपचारान् समर्पयामि ॥ (इति तुलसीदळं समर्प्य)

॥ शंखभ्रमणम् ॥

पिशाच यक्ष राक्षस दुर्दर्शन निवृत्त्यर्थं, बिंबच्छाया दोष परिहारार्थं शंख भ्रमणं करि ( ति संकल्प्य – शुद्धोदकेन शंखमापूर्य – तुलसीदलं निक्षिप्य – शंखमुद्रां, धेनुमुद्रां प्रदर्श्य – मूलेनाऽष्टवारं अभिमंत्र्य )

ॐ इमा आपः इति ऐतरेय आपोऽनुष्टुप् । शंख भ्रमणे विनियोगः ॥

ॐ॥ इमा आपः शिवतमा इमाः सर्वस्य भेषजीः ।

इमा राष्ट्रस्य वर्धनीरिमा राष्ट्र भृतोऽमृताः ॥

(इति पादादि मुकुट पर्यंतं, नाभ्यादि मुकुट पर्यंतं, हृदयादि मुकुट पर्यंतं, प्रादक्षिण्येन त्रिरावृत्या भ्रामयेत्, तदुदकं पात्रे निधाय शंखं संस्थाप्य)

॥ रमादि पूजा ॥

(नैवेद्य शेषं पात्रांतरे किंचित् निधाय सत्यंत्वर्तेन परिशिंचामि . . )

ॐ ॥ रमायै नमः । रमांतर्गत श्रीनारायण प्रीयतां । प्रीतोभवतु । श्रीकृष्णार्पणमस्तु ।

ॐ ॥ श्रीरमायै नमः महानैवेद्यं समर्पयामि ।

ॐ ॥ रमा ब्रह्मादयो देवाः सनकाद्याः शुकादयः ।

श्रीनृसिंह प्रसादोयं सर्वे गृह्णंतु वैवाः ॥

॥ श्री मुख्य प्राण पूजा ॥

(बळित्था सूक्तस्यानंतरं)

ॐ नमो भारतीरमण मुख्य प्राणाय नमः। ॐ ब्रह्मणे नमः ।

ॐ तत्वज्ञानाय नमः । ॐ वैष्णवाचार्याय नमः । ॐ व्यासशिष्याय नमः ।

ॐ यतीश्वराय नमः । ॐ पूर्णप्रज्ञाय नमः । ॐ ज्ञानदात्रे नमः ।

ॐ मध्वाय नमः । ॐ ध्वस्त दुरागमाय नमः । ॐ सनाम्ने नमः । ॐ जितवादिने नमः । ॐ जितेंद्रियाय नमः । ॐ श्री मदानंदतीर्थ = भगवत्पादाचार्येभ्यो नमः ॥

निस्वानां कति पय भुक्ति युक्त भक्तं । भक्तानां व्यधित चतुर्गुणं दयालुः ।

भुंक्ते स्म त्रिदश नरो प भोज्य मन्नं । संप्रीत्यै स धन वतां बृहत् प्रबोधः ॥

(शंखोदक, तीर्था, गंधाक्षता, तुलसीपुष्पाणि समर्पयेत्)

ॐ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् ॥ सत्यंत्वर्तेन परिषिंचामि । श्री भारतीरमण मुख्यप्राणांतर्गत श्री लक्ष्मीवेंकटेशः प्रीयतां ।

ॐ ॥ सर्वोत्तमो विष्णुरथो रमा च ब्रह्मा च वायुश्च तदीय पत्न्यौ ।

अन्येच देवाः सततं प्रसन्ना हरौ सुभक्तिं मयि संदि शंतु ॥

॥ अथ समापनं ॥

ॐ आत्मादेवानामनिलो वातायनः वायुस्त्रिष्टुप् । प्रावाहने विनियोगः ॥ (१०. १६०. ४)

ॐ॥ आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।

घोषा इदस्य शृण्विरेन रूपं तस्मै वाताय हविषा विधेम ।

ॐ नमो नारायणाय । एह्येहि देव प्रतिमास्थित श्रीपुरुषोत्तम प्रसीद भगवन्नागच्छ भगवंतं सश्रीकं सपरिवारं श्रीलक्ष्मीनारायणं मम हृत् कमले

(अन्य गृहे – सूर्यमंडले) प्रावाहयामि ॥

याचेऽहं त्वां हृषीकेश नमामि पुरुषोत्तम ।

हृदये कुरु संवासं श्रिया सह जगत्पते ॥

चंद्रस्थ वामनहरे सर्व लोक सुख प्रद ।

मुकुली कुरु हृत्कंजं पूर्ववत् स्थापयस्व तत् ॥

आसनाद्यनु यागांतं सर्वमन् यन्मया कृतं ।

मंत्र हीनं क्रियाहीनं भोगहीनमभक्तिकं ॥

तत्सर्वं क्ष्यम्यतां देव दीनं मामात्म सात्कुरु । (इति प्रार्थ्य)

यांतु देवगणाः सर्वे पूजा मादाय मामकीं ।

इष्ट काम्यार्थ सिद्ध्यर्थं पुनरागमनायच ॥ (इति घंटानादं कुर्यात्)

आवाहित देवताभ्यो नमः । यथा स्थान मुद्वासयामि ।

॥ समापनं ॥

ॐ ॥ यस्य स्मृत्या च नामोक्त्या तपः पूजा क्रियादिषु ।

न्यूनं संपूर्ण तां याति सद्यो वंदे तमच्युतं ॥

मंत्र हीनं क्रियाहीनं भक्ति हीनं जनार्दन ।

यत्कृतंतु मयादेव परिपूर्णं तदस्तुमे ॥

अनेन प्रातः काले मयाकृतेन श्रीलक्ष्मीनारायण पूजा कर्मणा भारतीरमण मुख्यप्राणांतर्गत श्रीलक्ष्मिनारायण प्रीयतां। मासनियामक माधव प्रीयतां । प्रीतो भवतु । कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्म नावाऽनुसृत स्वभावं । करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

श्रीकृष्णार्पणमस्तु ॥

॥ अथ मन्युसूक्तं ॥

ॐ यस्तेमन्यो इति चतुर्दश ऋचस्य सूक्तस्य ।तापसो मन्युः भीमसेनो वा ऋषिः । आद्यायाः जगती छंदः । ततो नवानां त्रिष्टुप् छंदः । ततश्चतुर्णां जगती छंदः । मन्युनामक श्रीलक्ष्मीनृसिंहो देवता । मन्युसूक्त मंत्र. . विनियोगः ॥ (१०–८३–१ & १०–८४–१)

ॐ ॥ यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।

साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥ १ ॥

मन्युरिंद्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः ।

मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥ २ ॥

अभीहि मन्यो तवसस्तवीयांतपसा युजा वि जहि शत्रून् ।

अमित्रहा वृत्रहा दस्युहा च विश्वावसून्या भरात्वं नः ॥ ३ ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयं भूर्भामो अभिमातिषाहः ।

विश्वचर्षणिः स हुरिः सहा वानस्मास्वोजः पृतनासु धेहि ॥ ४ ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।

तंत्वा मन्यो अक्रतुर्जिहीळाहं स्वातनूर्बलदेयाय मेहि ॥ ५ ॥

अयं ते अस्म्युपमेह्यर्वां प्रतीचीनः सहुरे विश्वधायः ।
मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूंरुत बोध्यापेः ॥ ६ ॥
अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जं घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥ ७ ॥
त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्रयंतु नरो अग्निरूपाः ॥ ८ ॥
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्न सहुरे हूत एधि ।
हत्वाय शत्रून्विभजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ ९ ॥
सहस्व मन्यो अभिमातिमस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ॥ १० ॥
एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे ॥ ११ ॥
विजेषकृदिंद्र इवानवब्रवो ३ ऽ स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आ बभूथ ॥ १२ ॥
आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥ १३ ॥
संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रव पराजितासो अप नि लयंताम् स्वस्ति ॥ १४ ॥
॥ ॐ शांतिः शांतिः शांतिः ॥

शालिग्राम शिलास्पर्शं येकुर्वंति दिने दिने ।

वांछंति करस्पर्शं श्इं देवाः स्वासवाः ॥

पूजाकाले मंत्र तंत्र क्रिया भक्ति लोप दोष प्रायश्चित्तार्थं

नामत्रय महा मंत्र जपं करिष्ये ।

ॐ श्री अच्युताय नमः । ॐ श्री अनंताय नमः । ॐ श्री गोविंदाय नमः ॥

ॐ श्री अच्युता ऽ नंत गोविंदेभ्यो नमः । श्री मध्वेशार्पणमस्तु ॥

॥ जपपूजा स्थळ प्रोक्षणं ॥

अद्यानो इत्यस्य श्यावाश्वात्रेयः सविता गायत्री ॥ जपपूजा स्थळ प्रोक्षणे विनियोगः ॥ (५–८२–४)

ॐ॥ अद्यानो देव सवितः प्रजा वत्सावीः सौभगम् । परा दुः ष्वप्न्यं सुव ॥

विश्वानि देव सवितर् दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥

॥ क्षमापना ॥

ॐ ॥ जितंते पुंडरीकाक्ष पूर्ण षाड्गुण्य विग्रह ।

परानंद परब्रह्म नमस्ते चतुरात्मने ॥ १ ॥

नमस्ते पीतवसन नमः कटक हारिणे ।

नमो नीलालका बद्ध वेणी सुंदर पुंगव ॥ २ ॥

याचेऽहं करुणासिंधो यावज्जीव मिदंतव ।

अदैन्यं देह दार्ढ्यं मे त्वत् पादांबुज सद्गतिम् ॥ ३ ॥

न जाने कर्म यत् किंचिन् नापि लौकिक वैदिके ।

न निषेध विधी विष्णो तव दासोऽस्मि केवलं ॥ ४ ॥

अपराध सहस्राणि क्रियंतेऽहर्निशं मया ।

तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥ ५ ॥

आपाद मौलि पर्यंतं पश्यतः पुरुषोत्तमं ।

पातकानि विनश्यति किं पुनश्चोप पातकैः ॥ ६ ॥

संपूजितं हरिं दृष्ट्वा पुनर्जन्म न विद्यते ।

नाहं कर्ता हरिःकर्ता तत्पूजा कर्मचाखिलं ॥ ७ ॥

तथाऽपि मत्कृता पूजा तत्प्रसादेन नान्यथा ।

कर्मन्यासो हरेरेवं विभोस्तृप्ति करः सदा ॥ ८ ॥

स्व वंदनं यथा पित्रा कारितं शिशु कर्तृकम् ।

एवं पूजा विष्ण्वधीना भवेज्जीव कृतेत्यपि ॥ ९ ॥

न जाने कर्म यत्किंचिन् नापि लौकिक वैदिके ।

न निषेध विधी विष्णो तव दासोऽस्मि केवलम् ॥ १० ॥

कर्मणा मनसा वाचा याचेऽहं त्वां मतिं प्रभो ।

केशवाराधने यास्याज्जन्म जन्मांतरेष्वपि ॥ ११ ॥

मादृशोन परः पापी त्वादृशो न दया परः ।

दासोऽयमिति मां मत्वा क्षमस्व पुरुषोत्तम ॥ १२ ॥

पापोऽहं पाप कर्माहं पापात्मा पाप संभवः ।

त्राहिमां पुंडरीकाक्ष शरणागत वत्सल ॥ १३ ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्दन ॥ १४ ॥

यः सर्व गुण संपूर्णः सर्व दोष विवर्जितः ।

प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥ १५ ॥

(इति प्रार्थयेत् – जितंते स्तोत्र, शतापराध स्तोत्राणि पठेत्)

॥ प्रदक्षिण नमस्कार ॥

ॐ ॥ यानिकानि च पापानि जन्मांतर कृतानि च ।

तानि तानि विनश्यंति प्रदक्षिण पदे पदे ॥ १ ॥

तीर्थकोटि सहस्राणि व्रतकोटि शतानिच ।

नारायण प्रणामस्य कलां नार्हंति षोडशीम् ॥ २ ॥

उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।

पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टांग ईरितः ॥ ३ ॥

नमोऽस्त्वनंताय सहस्र मूर्तये सहस्रपादाक्षि शिरोरु बाहवे ।

सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटि युगधारिणे नमः ॥ ४ ॥

नमो ब्रह्मण्य देवाय गो ब्राह्मण हितायच ।

जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ ५ ॥

कल्याणाद्भुत गात्राय कामितार्थ प्रदायिने ।

श्रीमद्वेंकट नाथाय श्रीनिवासाय ते नमः ॥ ६ ॥

नमो नमोऽशेष दोष दूर पूर्ण गुणात्मने ।

विरिंच शर्व पूर्वेड्य वंद्याय श्रीवरायते ॥ ७ ॥

नमो नमो नमो नमो नतोऽस्मिते सदा पदम् ।

समस्त सद्गुणोच्छ्रितं नमामि ते पदं पुनः ॥ ८ ॥

स्वतंत्रायाऽखिलेशाय निर्दोष गुणरूपिणे ।

प्रेयसेमे सुपूर्णाय नमो नारायणाय ते ॥ ९ ॥

परमात्मने सततमेक रूपिणे दश रूपिणे शतसहस्र रूपिणे ।

अविकारिणे स्फुटमनंत रूपिणे सुखचित् समस्त तनवे नमो नमः ॥ १० ॥

नमो नमस्तेऽखिल कारणाय नारायणायार्ति विनाशनाय ।

सर्वागमाम्नाय महार्णवाय नमोऽपवर्गाय परायणाय ॥ ११ ॥

मातर्नमामि कमले कमलासनाद्यैर् देवैः पदांबुज युगं तवसेंद्र रुद्रैः ।

आराधितं विविधभूरुह दिव्य पुष्पैर् मां रक्ष रक्ष वितरस्व ममेप्सितार्थान् ॥ १२ ॥

इतिदेवीं ततोनत्वा अनंत गरुडादिकान् ।

अन्यांश्च वैष्णवान् नत्वा कृतार्थोऽस्मीति चिंतयेत् ॥ १३ ॥

मातर्मे मातरिश्वन् पितर तुल गुरो भ्रातरिष्टाप्त बंधो ।

स्वामिन् सर्वांतरात्मन्नजर जरयितर् जन्म मृत्या मयानाम् ॥ १४ ॥

गोविंदे देहि भक्तिं भवति च भगवन्नूर्जितां निर्निमित्तां ।

निर्व्याजां निश्चलां सद्गुण गण बृहतीं शाश्वतीं माशु देव ॥ १५ ॥

अनेन प्रदक्षिण नमस्कार करणेन भगवान् श्रीभारतीरमण मुख्यप्राणांतर्गत श्रीलक्ष्मीनारायण प्रीयतां । श्री मध्वेशार्पणमस्तु । श्री मासनियामक श्रीमाधवाय नमः । श्रीकृष्णार्पणमस्तु । श्रीहरये नमः ॥
श्री हरिः ॐ ॥

॥ ॐ शांतिः शांतिः शांतिः ॥

॥ श्रीः ॥

॥ वैश्वदेवः ॥

ॐ॥ श्री गुरुभ्यो नमः ॥ ॐ श्री परम गुरुभ्यो नमः ॥ ॐ श्रीमदानंदतीर्थ भगवत्पादा चार्येभ्यो नमः ॥ श्रीमद्धनुमद्भीम मध्वांतर्गत रामकृष्ण वेदव्यासात्मक श्रीलक्ष्मी हयग्रीवाय नमः ॥ हरिः ॐ ॥

आचम्य . . . प्राणानायम्य . . . संकल्प्य ... शुभतिथौ । यज्ञ पुरुषांतर्यामि श्री
भारतीरमण मुख्यप्राणांतर्गत श्री हरिणीपति श्रीपरशुराम प्रेरणया, हरिणीपति श्रीपरशुराम प्रीत्यर्थं खंडन, पेषण, चुल्ली, भर्जन, उदकुंभे, इत्यादि पंचसूना दोषा प्रायश्चित्तार्थं आत्मान्न संस्कारार्थं, अद्य प्रातः सायं वैश्वदेव होमाख्यं कर्म करिष्ये ।
ॐ ॥ स्वाहायै नमः ॥ ॐ स्वाहां आवाहयामि ॥ तस्यां ॥ ॐ भारत्यै नमः ॥
भारतीं अनुसंधाय ॥ तस्यां ॥ ॐ श्रीं ॐ ऋतुस्नातां हरिणीरूपिणीं लक्ष्मीं अनुसंधाय ॥ स्वाहादेवि ध्यानं ॥ ॐ॥ स्वभर्तृः संस्थितामंके देवानां हव्यवाहीनीं । रक्तवर्णां रक्तवस्त्रां स्वाहां अग्निप्रियां भजे ॥ इति स्वाहां ध्यात्वा ॥ तदंतस्थां भारतीं ध्यात्वा ॥
भारति ध्यानं :-
ॐ ॥ उद्यद्दिवाकर समूह निभां स्वभर्तृ रंकस्थितामभय सद्वर बाहु युग्मां ।
मुद्रांच तत्व दृशये वर पुस्तकं च दोर्युग्मकेन ददतीं स्मरतात्म विद्यां ॥
तस्यां ऋतुस्नातां हरिणी रूपिणीं लक्ष्मीं ध्यायेत् ॥
महालक्ष्मी ध्यानं ॥

ॐ ॥ कौशेय पीत वसनामरविंद नेत्रां पद्मद्वया $ भय वरोद्यत पद्म हस्तां ।
उद्यच्छतार्क सदृशीं परमांक संस्थां ध्यायेद्विधि ईश नुत पाद युगां जनित्रीं ॥

॥ अग्न्यावाहनं ॥

ॐ जु दमूना आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् । एह्यग्ने राहूगणो
गौतमोऽग्निस्त्रिष्टुप् । अग्न्यावाहने विनियोगः ॥ (१–७६–२)
ॐ ॥ जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि ॥ १ ॥
एह्यग्न इव होता निषीदादब्ध सुपुर एता भवानः ।
अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसायदेवान् ॥ २ ॥
ॐ यज्ञपुरुषाय नमः । ममहृत्कमलात् अग्नौ परशुरामं आवाहयामि ।इति
अक्षतैरावाह्य । ॐ अग्नये नमः । ॐ अग्नये नमः । ॐ अग्नये नमः । ॐ अग्नये नमः ।(इति
चत्वारमुक्त्वा)

॥ अग्नि प्रतिष्ठापनं ॥

समस्त व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती । अग्नि प्रतिष्ठापने विनियोगः ॥
ॐ ॥ भूर्भुवः स्वरोम् ॥
इति आत्माभिमुखं पाणिभ्यां । श्री विष्णुवीर्यात्मकं रुक्मक नामानमग्निं प्रतिष्ठापयामि ।
इत्यग्निं प्रतिष्ठाप्य । प्रोक्षित इंधनानि तुलसी काष्ठां निक्षिप्य । वेणुधमन्या प्रबॉध्य । ध्यायेत् ॥

॥ अथ अग्नि मूर्ति ध्यानं ॥

ॐ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं । सुवर्ण वर्ण मनलं समिद्धं विश्वतो मुखं ॥ कुंड मध्ये स्थितां लक्ष्मीं सर्वाभरण भूषितां । सर्वावयव संपूर्णां ऋतुस्नातां विचिंतयेत् देवं नारायणं ध्यात्वा सर्व लक्षण लक्षितं । चतुर्बाहुं विशालाक्षं कोमलं पीतवाससं ॥
चत्वारि शृंगा गौतमो वामदेवोग्निस्त्रिष्टुप् । अग्निमूर्ति ध्याने विनियोगः ॥
ॐ ॥ चत्वारि शृंगा त्रयो अस्य पादा द्वेशीर्षे सप्त हस्तासो अस्य ।

त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥

सप्तहस्तश्चतुः शृंगः सप्त जिह्वो द्विशीर्षकः । त्रिपात् प्रसन्न वदनः सुखासीनः शुचिस्मितः ॥ स्वाहांतु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा । बिभ्रद्दक्षिण हस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं ॥ तोमरंव्यजनं वामैः घृतपात्रं च धारयन् । मेषारूडो जटाबद्धो गौरवर्णो महौजसः ॥ धूम्र ध्वजो लोहिताक्षः सप्तार्चि सर्वकामदः ।

आत्माभिः मुखमासीन एवं रूपो हुताशनः ॥

तदंतस्थं मुख्यप्राणं ध्यायेत् ॥

ॐ ॥ उद्यद्रवि प्रखर सन्निभमच्युतांके स्वासीनमस्य नुति नित्य वचः प्रवृत्तिं ।

ध्यायेद्गदा भय करं सुकृतांजलिंतं प्राणं यथेष्ट तनु मुन्नत कर्म शक्तिं ॥

तस्मिन्नेव श्रीहरिणीपति श्रीपरशुरामं ध्यायेत् ॥

श्री परशुराम ध्यानं ॥

ॐ ॥अंगारवर्ण मभितोंड बहिः प्रजाभिः व्याप्तं परश्वद धनुर्धर मेकवीरं ।

ध्याये दजेश पुरुहूत मुखैः स्तुवद्भिः आवीतमात्म पदवीं प्रतिपादयंतं ॥

एवं संचिंत्यमनसा वह्निमध्ये समाह्वयेत् ॥ अग्नि सम्मुखी करणं ॥

एषहिदेवो हिरण्यगर्भोअग्निस्त्रिष्टुप् । अग्नि सम्मुखीकरणे विनियोगः ॥

ॐ ॥ एष हि देवः प्रदिशोनु सर्वाः पूर्वोहिजातः स उ गर्भे अंतः ।

सविजायमानः स जनिंचिमाणः प्रत्यङ्मुखासिष्ठति विश्वतो मुखः ॥

हे अग्ने–शांडिल्य गोत्र–वैश्वानञ –मेषारूढ–वरप्रद–प्राङ्मुखोदेवाः–अग्न्यंतर्गत श्री भारतीरमण मुख्यप्राणांतर्गत हरिणीपति श्री परशुराम मम अभिसम्मुखो भव ॥ सुप्रतिष्ठितो भव । सुप्रसन्नो भव । वरदो भव । (पूर्वक्के हूवु मंत्राक्षतॆ हाकि)

परिषेकः : (पर्युक्षणं, परिषेचनं, परिसमूहनं, परिस्तीर्य ) विश्वानिनोत्यनयो

आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् । द्वाभ्यां मंत्राभ्यां अग्न्यर्चने विनियोगः ॥(५–४–९)

ॐ ॥ विश्वानिनो दुर्गहा जातवेदः सिंधुं ननावा दुरितातिपर्षि ।

अग्नेअत्रिवन्नमसा गृणानो (ओ) ३ स्माकं बोध्यविता तनूनां ॥
यस्त्वाहृदाकीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु देहि प्रजाभिरग्ने अमृतत्वमश्यां ॥
यस्मैत्वं आत्रेयो वसुश्रुतोऽग्नि प्रिष्टुप्। अग्नि प्रार्थने विनियोगः ॥
ॐ ॥ यस्मैत्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं ।
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥
ॐ अग्नये नमः । ॐ हुतवहाय नमः । ॐ कृष्णवर्त्मने नमः । ॐ देवमुखाय नमः । ॐ सप्तजिह्वाय नमः । ॐ वैश्वानराय नमः । ॐ जातवेदसे नमः ।
ॐ यज्ञपुरुषाय नमः ॥ (ऎंटु दिक्किगू हूवु मंत्राक्षते हाकि)

श्री रुक्मक नामानमग्ने षोडश संस्कारार्थं, वैष्णवत्व सिद्ध्यर्थं, वैश्वदेव षाड्गुण्यार्थं व्याहृति होमं होष्ये ।
(सव्य पाणिं हृदये निधाय)
श्री रुक्मक नामानमग्ने (गर्भादान, पुंसवन, सीमंत, वैष्णव बलि, जातकर्म,
नामकरण, निष्क्रमण, अन्न प्राशन, चौल, उपनयन, महानाम्नी व्रत, महाव्रत,
उपनिषत् व्रत, गोदान व्रत, समावर्तन, विवाह ) कर्म संस्कारं संपादयामि ।
ॐ ॥ भूः स्वाहा ॥ अग्नये श्री अनिरुद्धायेदं न म म ।
ॐ ॥ भुवः स्वाहा ॥ वायवे श्री प्रद्युम्नायेदं न म म ।
ॐ ॥ स्वः स्वाहा ॥ सूर्याय श्री संकर्षणायेदं न म म ।
ॐ ॥ भूर्भुवः स्वः स्वाहा ॥ प्रजापते श्रीवासुदेवायेदं न म म ।
(अग्निं परिषिंचामि) श्री रुक्मक नामानमग्नेः (वैष्णवत्व सिद्ध्यर्थं) श्रीनारायण अष्टाक्षर मंत्रेण होमं होष्ये)
ॐ॥ ॐ नमो नारायणाय स्वाहा ॥ ॐ नमो नारायणायेदं नमम ।
श्री रुक्मक नामानमग्नेः वैष्णवत्व सिद्ध्यर्थं
श्रीवासुदेव द्वादशाक्षर मंत्रेण होमं होष्ये ।

ॐ ॥ ॐ नमो भगवते वासुदेवाय स्वाहा ॥ ॐ नमो भगवते वासुदेवायेदं नमम । श्री रुक्मक नामानमग्नेः वैष्णववीर्यत्व सिद्ध्यर्थं पुरुष सूक्तेन होमं होष्ये । (ॐ परमपुरुषायेदं न म म)

ॐ ॥ सहस्रशीति षोळषर्चस्य सूक्तस्य । नारायण ऋषिः । अनुष्टुप् छंदः । अंत्या त्रिष्टुप् छंदः । परमपुरुषो देवता । पुरुषसूक्त आज्यहोमे विनियोगः ॥ (१०–९०–१)

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलं ॥ १ ॥
पुरुष एवेदं सर्वं । यद्भूतं यच्च भव्यं ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमाऽतो ज्यायाश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहा भवात्पुनः ।
ततो विश्वं व्यक्रामत् । साशनानशने अभि ॥ ४ ॥
तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ ५ ॥
यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसंतो अस्यासीदाज्यं । ग्रीष्म इध्मश्शरद्धविः ॥ ६ ॥
तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजंतः । साध्या ऋषयश्च ये ॥ ७ ॥
तस्मात् यज्ञात्सर्वहुतः । संभृतं पृषदाज्यं ।
पशूगस्तागश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ॥ ८ ॥
तस्मात् यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छंदांसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ९ ॥

तस्मादश्वा अजायंत । ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ १० ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।

मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ ११ ॥

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः । पद्भ्यां शूद्रो अजायत ॥ १२ ॥

चंद्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।

मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ १३ ॥

नाभ्या आसीदंतरिक्षं । शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोतात् । तथा लोकाग्ं अकल्पयन् ॥ १४ ॥

सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः ।

देवा यद्यज्ञं तन्वाना : । अबध्नन् पुरुषं पशुं ॥ १५ ॥

यज्ञेन यज्ञमयजंत देवाः । तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचंते । यत्र पूर्वे साध्याः संति देवाः ॥ १६ ॥

श्री रुक्मक नामानमग्नेः वैष्णववीर्यत्व सिद्ध्यर्थं श्री विष्णु षडक्षर मंत्रेण होमं होष्ये ।

ॐ ॥ विष्णवे स्वाहा ॥ ॐ विष्णव इदं न म म ॥

ॐ ॥ ॐ नमो नारायणाय स्वाहा ॥ ॐ नमो नारायणायेदं न म म ।

(इति नारायणाऽष्टाक्षर मंत्रेण ८ आहुतयः) (अग्निं परिषिंचामि)

ॐ ॥ क्लीं कृष्णाय स्वाहा ॥ ॐ क्लीं कृष्णायेदं नमम (इति कृष्ण षडक्षर मंत्रेण ८ आहुतयः)

ॐ ॥ पुरुषाय स्वाहा ॥ ॐ पुरुषायेदं नमम ॥ (अग्निं परिषिंचामि)

॥ प्रातराहुतिः ॥

ॐ ॥ सूर्याय स्वाहा ॥ ॐ सूर्यायेदं नमम ॥

ॐ ॥ प्रजापतये स्वाहा ॥ ॐ प्रजापतयेदं नमम ॥ (अग्निं परिषिंचामि)

॥ सायं आहुतिः ॥

ॐ ॥ अग्नये स्वाहा ॥ ॐ अग्नयेदं नमम ॥ ॐ ॥ प्रजापतये स्वाहा ॥ ॐ प्रजापतयेदं नमम ॥ (अग्निं परिषिंचामि)

ॐ ॥ सोमाय वनस्पतये स्वाहा ॥ ॐ सोमाय वनस्पतयेदं नमम ॥

ॐ ॥ अग्नि षोमाभ्यां स्वाहा ॥ ॐ अग्निषोमाभ्यां इदं नमम ॥

ॐ ॥ इंद्राग्निभ्यां स्वाहा ॥ ॐ इंद्राग्निभ्यां इदं नमम ॥

ॐ ॥ द्यावा पृथिवीभ्यां स्वाहा ॥ ॐ द्यावा पृथिवीभ्यां इदं नमम ॥

ॐ ॥ धं धन्वंतरये स्वाहा ॥ ॐ धन्वंतरयेदं नमम ॥

ॐ ॥ इंद्राय स्वाहा ॥ ॐ इंद्रायेदं नमम ॥

ॐ ॥ विश्वेभ्यो देवेभ्यो स्वाहा ॥ ॐ विश्वेभ्यो देवेभ्यो इदं नमम ॥

ॐ ॥ ब्रह्मणे स्वाहा ॥ ॐ ब्रह्मण इदं नमम ॥ हस्तं प्रक्षाळ्य (अग्निं परिषिंचामि)

आहुति संसर्ग दोष प्रायश्चित्तार्थं वैश्वदेव षाड्गुण्यार्थं व्याहृति होमं होष्ये ॥

ॐ ॥ भूः स्वाहा ॥ अग्नये श्री अनिरुद्धायेदं न म म ।

ॐ ॥ भुवः स्वाहा ॥ वायवे श्री प्रद्युम्नायेदं न म म ।

ॐ ॥ स्वः स्वाहा ॥ सूर्याय श्री संकर्षणायेदं न म म ।

ॐ ॥ भूर्भुवः स्वः स्वाहा ॥ प्रजापते श्रीवासुदेवायेदं न मम ।

ॐ चम इत्यस्य सारस्वतोऽग्निस्त्रिष्टुप् । अग्निप्रार्थने विनियोगः ॥

ॐ ॥ ॐ च मे स्वरश्च मे यज्ञोपचते नमश्च । यत्ते न्यूनं तस्मै त उपयत्तेऽतिरिक्तं तस्मै ते नमः ॥ ॐ अग्नये नमः ॥ स्वस्ति ॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं । आयुष्यं तेजं आरोग्यं देहि मे हव्यवाहन । श्रियं देहि मे हव्य वाहन ।ॐ नम इति । चतुः सागर पर्यंतम् गो ब्राह्मणेभ्यः शुभं भवतु । (प्रवर गोत्राभिवादन नाममुच्चार्य) . . . अभिवादयामि ॥

होमांते यज्ञनामक हरिणीपति श्रीपरशुरामाय समस्त राजोपचार पूजां

समर्पयामि (पंचोपचारैः संपूज्य गंधाक्षतान्, तुलसीपुष्पाणि, नैवेद्यं, आज्योपहार नैवेद्यं, पूगीफल तांबूलं इत्यादि )

ॐ अग्नेनयेत्यष्ठर्चस्य सूक्तस्य अगस्त्योऽग्निस्त्रिष्टुप् । अग्नि प्रदक्षिण नमस्कारे विनियोगः ॥ (१–१८९–१)

ॐ ॥ अग्ने नय सुपथा राये अस्मान्, विश्वानि देव वयुनानि विद्वान् ।
युयोध्य(अ)१स्मज्जुहुराण मेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥
अग्ने त्वं पारया नव्यो अस्मान्त् स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥
अग्ने त्वमस्मद्युयो ध्यमीवा अनग्नित्रा अभ्यमंत कृष्टीः ।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभि रमृतेभिर्यजत्र ॥ ३ ॥
पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठं नूनं विदन्मापरं सहस्वः ॥ ४ ॥
मा नो अग्नेव सृजो अघायाविवे रिपवे दुच्छुनायै ।
मा दद्वते दशते मादते नो मा रीते सहसावन्परा दाः ॥ ५ ॥
वि घ त्वावाङ् ऋतजात यं सद्गृणानो अग्ने तन्वे (ए) ३ वरूथम् ।
विश्वाद्रि रिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥ ६ ॥
त्वं ताङ् अग्न उभयान्, वि विद्वान्, वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर् नाक्रः ॥ ७ ॥
अवोचाम निवचनास्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥

ॐ अग्निस्तुवि इत्यस्य आत्रेयोऽग्निरनुष्टुप् । प्रार्थने विनियोगः ॥ (५– २५– ५)

ॐ ॥ अग्निस्तुविश्रवस्तमं तुवि ब्रह्माणमुत्तमं ।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥

यज्ञेशाच्युत गोविंद माधवानंत केशव ।

कृष्ण विष्णु हृषीकेश वासुदेव नमोस्तुते ॥ १ ॥

कृष्णाय गोपिनाथाय चक्रिणे मुर वैरिणे ।

अमृतेशाय गोपाय गोविंदाय नमो नमः ॥ २ ॥

प्रमादात् कुर्वतां कर्म प्रच्यवेता ध्वरेषयत्।

स्मरणा देव तद्विष्णोः संपूर्णस्यादिति शृतिः ॥ ३ ॥

प्रायश्चित्तान्य शेषाणि तपः कर्मात्मकानिवैः ।

यानितेषा मशेषाणां श्री कृष्णानुस्मरणं परं ॥ ४ ॥

स्वरेण वर्णेन च यद्विहीनं तथैव हीनं क्रिययापि यच्च ।

यच्चातिरिक्तं मम तत् क्षमस्व तदस्तु चाग्ने परिपूर्णमेतत् ॥ ५ ॥

अग्नि मंडल मध्यस्थं चतुर्बाहुं किरीटिनं ।

भक्ताभीष्ट प्रदातारं ध्यायेद्यज्ञ भुजं हरिं ॥ ६ ॥

॥ समापनं ॥

यस्यस्मृत्याच नामोक्त्या तपोयज्ञ क्रियादिषु ।

न्यूनं संपूर्ण तां याति सद्योवंदे तमच्युतम् ॥

मंत हीनं क्रिया हीनं भक्ति हीनं रमापते ।

यत् कृतंतु मया देवा परिपूर्णं तदस्तु मे ॥

अनेन अद्य प्रातस्सायं वैश्वदेव होमेन अग्न्यंतर्गत भगवान्

भारतीरमण मुख्यप्राणांतर्गत यज्ञ नामात्मक हरिणीपति

श्रीपरशुरामः प्रीयतां । प्रीतो भवतु । मध्ये मंत्र तंत्र

स्वर वर्ण न्यूनाऽतिरिक्त लोप दोष प्रायश्चित्तार्थं नामत्रय महामंत्र जपं करिष्ये ॥ ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः । ॐ अच्युतानंत गोविंदेभ्यो नमः ॥

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मनावा प्रकृति स्वभावं ।

करोमि यद्यत् सकलं परस्मै श्रीमन्नारायणायेति समर्पयामि ॥

॥ श्रीकृष्णार्पणमस्तु ॥

ॐ ॥ गच्छ गच्छ सुरश्रेष्ठ देवासुर सुपूजितः ।

यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशनः ॥

ॐ अग्नये नमः । यथास्थानं प्रतिष्ठापयामि ॥ शोभनार्थे पुनरागमनायच ॥

॥ ॐ शांति शांति शांति ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ हरये नमः ॥ ॐ श्री हरिः ॐ ॥